शिवार्चनपरो भूत्वा पूजितस्तु यथाविधि ॥

End:

पृष्ठतः स्वर्गगामिनां कलेबरसमन्वितः ।
विधं(यद्)विमानमारुह्य सुखेनैव सुरालयम् ॥

Colophon:

इति भविष्योत्तरपुराणे अष्टमीचदुर्दशीव्रतकल्पं सम्पूर्णम् ॥

No. 8216. आरामप्रतिष्ठाकल्पः.

ĀRĀMAPRATIṢṬHĀKALPAḤ.

Pages, 13. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5763, wherein this has been shown as Vanapratiṣṭhākrama.

On the manner of consecrating a garden.

Almost complete.

Beginning:

अथारामप्रतिष्ठाकल्पविधिं व्याख्यास्यामः—

उदगयनापूर्यमाणपक्षे माघादिपञ्चमासे कार्त्तिकद्वितीये कर्तव्यम्। चन्द्र-सिते पक्षे कृष्णपूर्वार्धे वा गुरुशुक्रयोर्बालवृद्धयोर्मूढवर्जिते पञ्चाङ्गशुद्धे शुभदिने स्थिरनक्षत्रे शुभयोगे चन्द्रताराबलसमन्विते आरामप्रतिष्ठादिपूर्व दिवसे प्रातरुत्थाय दन्तधावनं कृत्वा प्रातस्सन्ध्यादिनित्यकर्मविधिं कृत्वा .

. . . . . प्रतिष्ठादिने वृक्षस्य समीपे पूर्व ईशान्यभागे वा द्वादश दशचतुर्हस्तमात्रं वा वेदिकां कार-येत्।

End:

इन्द्रं वो विश्वतस्परि हे इन्द्र अत्रागच्छ सपरिवारेभ्यो भूतेभ्य इमं बलिं ददामि सर्वेभ्यो भूतेभ्यः बलिं भक्षय मां रक्ष दिशो रक्ष आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता अस्माकमभ्युदयं कुरु। एवमेवान्यत्र दिक्षु वनस्पते शतवल्शो विरोह॥

शशाङ्कतोयेशकराद्यमित्रध्रुवाम्बुपुष्ये वसुदैवतेषु।
उद्यानवाप्यादितटाककूपकार्याणि सिध्यन्ति जलोद्धृतन्तत्॥

No. 8217. आर्द्राष्टमीव्रतकल्पः.

ĀRDRĀṢṬAMĪVRATAKALPAḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 43*a* of the MS. described under No. 3055.

Complete, as found in the Skāndapurāṇa.

Deals with the Vrata to be observed on the eighth lunar day in the dark fortnight of the month of Bhādrapada when the asterism Ārdrā is in the ascendant. The observance of this Vrata is supposed to have the power of bestowing on one wealth, fame, beauty and prosperity.

Beginning :

नमो गौर्यै स्कन्दमात्रे विश्वमूर्त्यै नमो नमः ।
त्वं गृहाण विरूपाक्ष रूपार्थेऽभ्यर्थितो मया ॥

* * * *

नभस्ये बहुलाष्टम्यां यदार्द्रा जायते तदा ।
व्रतमेतच्च दातव्यमुमामहेश्वरं विभुम् ॥
आरोग्यैश्वर्यसौभाग्यरूपसम्पत्प्रदायकम् ।

End :

त्रिनेत्रश्च महाभागस्सर्वाभरणभूषितः ।
तन्मन्त्रैः पूज्य विधिवत् पूजयेच्छङ्करं प्रति ॥

Colophon :

इति स्कन्दपुराणे आर्द्राष्टमीव्रतकल्पं सम्पूर्णम् ॥

No. 8218. उत्पलगौरीव्रतकल्पः.

UTPALAGAURĪVRATAKALPAḤ.

Substance, palm-leaf. Size, 16 × 1¼ inches Pages, 5. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

Begins on fol. 3*b*. The other works herein are Śravaṇadvādaśīvratakalpa 1*a*, Putrānantavratakalpa 6*a*, Putrasaṅkrāntīvratakalpa 8*a*, Bālādityavratakalpa 8*b*, Putragaṇapativratakalpa 10*a*.

This Vrata consists in worshipping Pārvatī on the day corresponding to that on which she is said to have come into existence again after having burnt up her body in a sacrificial ceremony performed by Dakṣa. Pārvatī is here considered to possess a body having the fragrance of the Utpala flower. Hence the name Utpalagaurī.

Beginning :

पूराभून्नर्मदातीरे प्रयागाख्या महापुरी ।
चकार चतुरास्योऽपि यत्र यागाननेकधा ॥

तत्र विप्राग्रणीरासीद्गौतमाख्यो महातपाः ।
आत्मानुरूपौ तस्यास्तां सुतौ श्रीपतिगोपती ॥
स कदाचिद् द्विजश्रेष्ठः कृतकृत्यः कृत कृतं (क्रमः) ।
ध्यात्वोत्पलाङ्ग्याः पार्वत्याः प्रादुर्भावं व्यलोकयत् ॥
ततस्सुतौ समाहूय स धर्मात्मेदमब्रवीत् ।
शृणुतां पुत्रकौ पूर्वं दक्षकन्या सती सती ॥
तनुं तत्याज केनापि कारणेन शिवप्रिया ।

* * * * *

अथार्के फल्गुनीं पूर्वां त्यक्त्वार्यमभमागते ।
उदभूदुत्पलामोदसौकुमार्यवती शिवा ॥

* * * *

दिनन्तदद्य संप्राप्तमुत्पलाङ्गीव्रतं युवाम् ।
कुरुतां पुत्रकौ सम्यक् सर्वकार्यार्थसिद्धये ॥

End :

अन्येद्युः प्रातरेवाथ व्रतभङ्गभयादसौ ।
पुष्करिण्यां पपाताथ कन्या मदनमञ्जरी ॥
तामालोक्य द्विजः कश्चित्समुद्धृत्य ततस्सुधीः ।
पित्रोस्समर्पयामास निवेद्य कृतमात्मनः ॥
सुतां निर्भर्त्सितौ भीतौ तोषयित्वा द्विजोत्तमम् ।
पुनर्व्रतङ्कारयित्वा तस्या दोरं बबन्धतुः ॥
सदृशाचारशीलां च.

No. 8219. उमामहेश्वरव्रतकल्पः.

UMĀMAHĒŚVARAVRATAKALPAḤ.

Substance, palm-leaf. Size, 17⅝ × 1⅜ inches. Pages, 33. **Lines**, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete: forms the 56th Adhyāya of the Brahmāṇḍa-purāṇa.

Begins on fol. 1*a* The other work herein is Kāmyavṛsōtsarjanavidhi 18*a*.

This Vrata consists in the worship of Parvatī and Paramēśvara on the full-moon day in the month of Bhādrapada The observance of this Vrata is considered to have the power of bestowing on one all desired prosperity and of leading one to the attainment of salvation after death.

Beginning:

उमामहेश्वरं नाम व्रतं सर्वफलप्रदम् ।
कर्तुं मम द्विजश्रेष्ठा अनुज्ञां कुरुत शुभाम् ॥
विघ्नेश्वरपूजां कृत्वा सङ्कल्प्य पूर्वोक्तैवङ्गुण. . . . . .
स्कान्दपुराणोक्तोमामहेश्वरव्रतं करिष्ये। . . . . . .
देवदेव महादेव सर्वसौभाग्यवर्धनम् ।
करिष्ये त्वद्व्रतं देव प्रसादं कुरु मे प्रभो ॥

End:

इह लोके तु विपुलान् भोगभोग्यान् यथेप्सितान् ।
तथैव स्वस्य देहान्ते प्रयाति परमां गतिम् ॥

Colophon:

इति ब्रह्माण्डपुराणे मार्कण्डेयसंवादे (उमामहेश्वरव्रतं) नाम षट्त्रिंशोऽध्यायः ॥

No. **8220.** उमामहेश्वरव्रतकल्पः.

UMĀMAHEŚVARAVRATAKALPAḤ.

Pages, 9. Lines, 8 on a page.

Begins on fol. 14*b* of the MS. described under No. 5852.

Complete as found in the Brahmavaivartapurāṇa.

Similar to the above.

Beginning:

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ श्रीउमामहेश्वरमुद्दिश्य उमामहेश्वरप्रीत्यर्थमुमामहेश्वरव्रतोद्यापनङ्करिष्ये, तदङ्गकलशपूजाङ्करिष्ये ।

उमामहेश्वरं सूत्रं सुगन्धि कुङ्कुमान्वितम् ।
निधाय तत्समीपे तु व्रतपूजापरायणः ॥

* * * *

पञ्चवक्त्रं सदानन्दमुमया सह शङ्करम् ।
आवाहयामि देवेशं व्रतसाफल्यहेतवे ॥
उमामहेश्वराय नमः आवाहनम् ।

End :

भुक्त्वा स विपुलान् लोकान् अन्ते (या)ति परं शिवम् ।
ते तस्य वचनं श्रुत्वा नैमिशारण्यवासिनः ॥
शिवलिङ्गार्चनरता व्रतमेतत्प्रचक्रमुः ।
प्रयान्ति शिवकैवल्यं व्रतेनानेन सुव्रताः ॥

Colophon :

इत्यार्षेयमहापुराणे ब्रह्मवैवर्तिकोमामहेश्वरव्रतकल्पं सम्पूर्णम् ॥

No. **8221**. उमामहेश्वरव्रतकल्पः.
UMĀMAHEŚVARAVRATAKALPAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 99*a* of the MS. described under No. 2907.
Complete. From Skāndapurāṇa.
Similar to the above.

Beginning :

देवदेव जगन्नाथ सर्वसौभाग्यदायक ।
करिष्ये त्वद्व्रतं देव प्रसादं कुरु मे शिव ॥
उमामहेश्वरं सूत्रं कङ्कुमाक्तं सदोरकम् ।
निधाय तत्समीपे तु व्रतपूजापरायणः ॥

End :

इह भुक्त्वा तु विमलान् सर्वान् भोगान् यथेप्सितान् ।
अनुभूय स देहान्ते प्रविशेत्परमां गतिम् ॥

Colophon :

इति स्कान्दपुराणे ब्रह्ममार्कण्डेयसंवादे उमामहेश्वरव्रतकल्पं सम्पूर्णम् ॥

No. **8222.** उमामहेश्वरव्रतकल्पः.

UMĀMAHĒSVARAVRATAKALPAḤ.

Pages, 9. Lines, 4 on a page.

Begins on fol. 108*a* of the MS. described under No. 3055.

Complete. Wants beginning.

Similar to the above.

Beginning :

दशाङ्गं गुग्गुलुं धूपं गृहाण गगनाधिक ।
त्रैलोक्यपापतिमिरहन्त्रे तुभ्यं हरात्मने ॥
दीपं समर्पये देव त्रैलोक्यतिमिरापहम् ।
ज्योतिरङ्गाय भर्गाय ज्योतिषामाकराय च ॥

End :

कृत्वा पञ्चदशापूपान् ब्राह्मणाय निवेदयेत् ।
भुक्त्वा चाक्षारलवणं शम्भुं मनसि संस्मरन् ॥
धृत्वा दोरं करे सत्यं कथाः कृत्वा तथा व्रती ।
दशपञ्चसु वर्षेषु एवं कुर्याद्विचक्षणः ॥

No. **8223.** उमामहेश्वरव्रतकल्पः.

UMĀMAHĒSVARAVRATAKALPAḤ.

Pages, 10. Lines, 6 on a page.

Begins on fol. 76*a* of the MS. described under No. 7758.

Complete.

Similar to the above.

Beginning :

सङ्कल्पमेवं कुर्वीत व्रतेनानेन सुव्रत ।
देवदेव जगन्नाथ सर्व(सौ)भाग्यवर्धन ॥

करिष्ये त्वद्व्रतं देव प्रसादं कुरु मे प्रभो । सङ्कल्पमन्त्रः ।
उमामहेश्वरं सूत्रं सुगन्धिं कुङ्कुमान्वितम् ।
निधाय तत्समीपे तु व्रती पूजापरायणः ॥
निधाय तत्समीपे तु दोरस्थापनमन्त्रतः ।
ध्यायेच्च दक्षिणामूर्तिं वह्निचन्द्रार्कलोचनम् ॥

End :

उमामहेश्वरं नाम व्रतानामुत्तमं व्रतम् ।
यः करोति लिखेद्वापि यः शृणोति नरोत्तमः ।
तस्य मुक्तिरवश्यं हि सत्यं सत्यं वदाम्यहम् ॥

Colophon :

इति श्रीब्रह्मकैवर्तपुराणे उमामहेश्वरव्रतं सम्पूर्णम् ॥

No. **8224.** उमामहेश्वरव्रतकल्पः.

UMĀMAHĒŚVARAVRATAKALPAḤ

Pages, 4. Lines, 4 on a page.

Begins on fol 49a of the MS. described under No. 3055.

Complete.

Similar to the above.

Beginning :

युधिष्ठिर उवाच—

केन धर्मेण नारीणां व्रतेन नियमेन च ।
सौभाग्यं जायते देव पुत्राश्च बहवः शुभाः ॥
धनधान्यसुवर्णश्च वस्त्राणि(विविधानि) च ।
. . . . . गश्च लभते सततं पुत्रपौत्रयोः ॥

श्रीकृष्ण उवाच—

शृणु पार्थ प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
यत्कृत्वाशु . . . . . जायते ॥
धनधान्यहिरण्यश्च दासीदासादिकं बहु ।
उत्पद्यते गृहे येन तद्व्रतं कथयामि ते ॥

उमामहेश्वरं नाम अप्सरोभिः पुरा कृतम् ।
. . . . . चान्यैः ऋषिकन्याभिरेव च ॥

End:

हैमीमुमां रजतपिण्डमयं महेशं रौप्यं सुरूपवृषभं समधिष्ठितौ वा ।
संपूज्य रक्तसितवस्त्रयुगा उभौ च नारी भवेदविधवा शतवर्षयुक्ता ॥

Colophon:

इति उमामहेश्वरव्रतकल्पं सम्पूर्णम् ॥

No. **8225.** उमामहेश्वरव्रतकल्पः.

UMĀMAHĒSVARAVRATAKALPAḤ.

Pages, 8. Lines, 4 on a page.

Begins on fol. 157*a* of the MS. described under No. 3055.

Incomplete.

Similar to the above.

Beginning:

कृत्वा पञ्चमुखं देवं कुशैः कुर्याद्विचक्षणः ।
वक्त्रे वक्त्रे त्रिभिर्दर्भैः पवित्रग्रन्थिसंयुतम् ॥
सङ्कल्पमेवं कुर्वीत मन्त्रेणानेन सुव्रत ।
देवदेव जगन्नाथ सर्वसौभाग्यवर्धन ।
करिष्ये त्वद्व्रतं देव प्रसादं कुरु मे प्रभो ।

End:

अथेन्द्रादिलोकपालान् पूजयेत् । देवस्योत्तरतो नन्दीश्वरमर्चयेत् ।
नमो रुद्राय शान्ताय कारणत्रयहेतवे.

No. **8226.** उमामहेश्वरव्रतकल्पः.

UMĀMAHĒŚVARAVRATAKALPAḤ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 47*a* of the MS. described under No. **5765**, wherein this is mentioned as Umāmahēśvarapūjāvidhāna.

Complete. From Brahmōttarapurāṇa.

Similar to the above.

See under the previous number for the Beginning

End:

इह भुक्त्वा सुविपुलान् भोगान् सर्वान् यथेप्सितम् ।
आयुरारोग्यमैश्वर्यमिष्यन्ति परमं शुभम् ॥
ते सूतवचनं श्रुत्वा नैमिशारण्यवासिनः ।
शिवलिङ्गार्चनरता व्रतमेतत्प्रचक्रमुः ॥
मन्त्रहीनं क्रिया . . . . . तदस्तु मे ॥

Colophon:

इति ब्रह्मोत्तरपुराणे उमामहेश्वरव्रतकल्पः सम्पूर्णः ॥

No. **8227.** उमामहेश्वरव्रतकल्पः.

UMĀMAHEŚVARAVRATAKALPAḤ.

Pages, 20. Lines, 7 on a page.

Begins on fol. 170*a* of the MS. described under **No. 7758**, wherein this has been omitted to be shown among the other works.

Complete.

Similar to the above.

Beginning:

देवदेव जगन्नाथ सर्वसौभाग्यदायक ।
करिष्ये त्वद्व्रतं देव प्रसादं कुरु मे प्रभो ॥

व्रतग्रहणम्—

नभस्ये मासि कर्तव्यं पौर्णमास्यां विधीयते ।
व्रतारम्भं प्रकुर्वीत . . तां मन्त्रपूर्वकम् ॥
नवकुम्भं समादाय सौवर्णञ्चाथ राजतम् ।
ताम्रं वा मृण्मये वापि सुश्लक्ष्णन्तु विधीयते ॥

End:

अद्यानेन मया देव व्रतमेतत्सुदुर्लभम् ।
कृतं भवतु सम्पूर्णमर्पयामि उमापते ॥

Colophon:

इति श्रीमार्कण्डेयपुराणे ब्रह्ममार्कण्डेयसंवादे उमामहेश्वरव्रतं सम्पूर्णम् ॥

No. **8228.** उमामहेश्वरव्रतकल्पः.

UMĀMAHĒŚVARAVRATAKALPAḤ.

Pages, 13. Lines, 5 on a page

Begins on fol. 33*b* of the MS. described under No 8179.

Complete.

Similar to the above.

Beginning:

देवदेव जगन्नाथ पुत्रसौभाग्यवर्धनम् ।
करिष्ये ते व्रतं देव प्रसादं कुरु मे शिव ॥

व्रतग्रहणमन्त्रः—

ध्याये त्वां दक्षिणामूर्तिं साम्बिकं च त्रिलोचनम् ।
गोक्षीरधवलाकारं पूर्णचन्द्रनिभाननम् ॥ ध्यानम् ।

End:

शिवप्रसादाद्देहान्ते शिवसायुज्यमाप्नुयात् ॥
य इदं शृणुयाद्वापि श्रावयेद्वा समाहितः ।
सोऽपि पापविनिर्मुक्तः प्रयाति शिवमन्दिरम् ॥

Colophon:

इति स्कन्दपुराणे प्रभासखण्डे ब्रह्ममार्कण्डेयसंवादे उमामहेश्वरप्रोक्तं उमामहेश्वरव्रतकल्पं संपूर्णम् ॥

No. **8229.** उमामहेश्वरव्रतोद्यापनम्.

UMĀMAHĒŚVARAVRATŌDYĀPANAM.

Pages, 5 Lines, 6 on a page.

Begins on fol. 53*a* of the MS. described under No. 5765, wherein this has been omitted to be shown among the other works.

Complete. From Brahmōttarapurāṇa.

On the manner of completing the Vrata mentioned above. It is prescribed that the Vrata should be observed for a period of three years.

Beginning:

ईश्वर उवाच—

आदौ मध्ये तथा चान्ते कुर्यादुद्यापनं व्रती ।
मन्त्रसङ्ख्यया वर्षसङ्ख्या पूर्वमुदाहृता ॥
शुद्धस्वर्णैर्निष्कपञ्चदशभिः प्रतिमाकृतिः ।
तस्याश्च दक्षिणामूर्तिरूपं सवेदि कारयेत् ॥
अशक्तस्तु तदर्धेन तदर्धार्धेन वा पुनः ।

End:

तद्व्रतस्य प्रभावेण देवैरपि सुपूजितः ।
आयुरारोग्यमैश्वर्यं प्राप्तवान्नगरेष्वपि ॥

* * * *

सूतस्य वचनं श्रुत्वा नैमिशारण्यवासिनः ।
शिवलिङ्गार्चनरता व्रतमेतत्प्रचक्रमुः ॥

Colophon:

इति ब्रह्मोत्तरपुराणे उमामहेश्वरोद्यापनकल्पस्सम्पूर्णः ॥

No. 8230. ऋषिपञ्चमीव्रतकथा.

RṢIPAÑCAMĪVRATAKATHA

Pages, 16. Lines, 6 on a page.

Begins on fol. 31*a* of the MS. described under No. 8166.

Complete: from Brahmāṇḍapurāṇa.

Contains the story regarding the performance of the Ṛṣipañcamīvrata, and illustrates the effects of the observance of the Vrata. This Vrata is ordained for women and is to be observed on the fifth day of the bright-fortnight in the month of Bhādrapada. It consists in the worship of the seven sages, Kaśyapa, Atri, Bharadvāja, Viśvāmitra, Gautama, Jamadagni and Vasiṣṭha.

Beginning:

ब्रह्मोवाच—

श्रृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
ऋषिपञ्चमीति विख्यातं सर्वपापप्रणाशनम् ॥
येन चीर्णेन राजेन्द्र नरकं नैव पश्यति ।
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥

End:

तावदारभ्य पञ्चम्यां व्रतं सम्यक् चचार ह ।
तस्य पुण्यप्रभावेण सर्वाभीष्टं च सिध्यति ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे ऋषिपञ्चमीव्रतकथनं नाम सप्तमोऽध्यायः ॥

No. **8231.** ऋषिपञ्चमीव्रतकल्पः.

ṚṢIPAÑCAMĪVRATAKALPAḤ.

Substance, palm-leaf. Size, 16⅛ × 1½ inches. Pages, 24. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on folio 41*a*. The other works herein are Aparaprayōga 1*a*, Viṣṇusahasranāmāvali 45*b*, Yamunāpūjā 52*a*, Āturasannyāsavidhi 53*a*, Yatisaṁskāra 54*b*, Sōmavāravrata 57*a*, Taittirīyabrāhmaṇa 61*a*, Varalakṣmīvrata 69*a*, Taittirīyabrāhmaṇa 72*a*.

On the manner of observing the Ṛṣipañcamīvrata noted under the previous number.

Beginning:

पूर्वोक्तएवङ्गुणविशेषण—तिथौ मम जन्मान्तरेषु . . . . . समस्तपापानां प्रायश्चित्तार्थं यथासंभवद्रव्येण यथासंभवनियमेन ब्रह्माण्डपुराणोक्तऋषिपञ्चमीव्रतङ्करिष्ये ।

ध्यायेद्दर्षीन् जटाकुण्डदण्डवल्कलधारिणः ।
द्विभुजान् साक्षसूत्रांश्च पापघ्नानमिवर्चसः ॥
कश्यपादिसप्तर्षीन् ध्यायामि ।
कश्यपस्सर्वभूतानां सर्वभूतेषु संस्थितः ।
नराणां क्षीणपापानाम् ऋषिरूपेण तिष्ठति ॥

कश्यपं ध्यायामि ॥

* * * *

इह जन्मनि पूर्वस्मिन्नवस्थात्रितयेष्वपि ।
त्व(म)त्तो यद्यत्पापजालं तस्मान्नाहि (त) मुनीश्वराः ॥
प्रार्थनम् । यस्य स्मृत्या चेति ॥

पूजाविधानं सम्पूर्णम् ॥

Colophon:

सिताश्व उवाच--
श्रतानि देवदेवेश व्रतानि सुबहूनि च ।
साम्प्रतं मे समाचक्ष्व व्रतं पापप्रणाशनम् ॥

ब्रह्मोवाच—
श्रृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
ऋषिपञ्चमीति विख्यातं सर्वपापप्रणाशनम् ॥

End:

एषामृषीणां च तपोधनानां व्रतेन साङ्गेन मनुष्यलोके ।
निस्तीर्य नार्यो निखिलञ्च पापं लोके च तस्मिन्नुपयाति(न्ति) शाश्वतम् ॥

Colophon:

इति श्रीमद्ब्रह्माण्डपुराणे ऋषिपञ्चमीव्रतं सम्पूर्णम् ॥

No. **8232**. ऋषिपञ्चमीव्रतकल्पः.

RṢIPAÑCAMĪVRATAKALPAḤ.

Substance, palm-leaf. Size, 11¾ × 1¼ inches. Pages, 17. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Begins on fol. 9*a*. The other works herein are Yamunāpūjā 1*a*, Ṛṣipañcamīvratōdyāpana 6*a*, Laksavartivratakalpa 18*a*, Gajalakṣaṇa (with Telugu tīkā), 27*a*.

Same as the above.

No. 8233. ऋषिपञ्चमीव्रतकल्पः.

ṚṢIPAÑCAMĪVRATAKALPAḤ.

Substance, palm-leaf. Size, 12¼ × 1¼ inches. Pages, 13. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 45*a*. The other works herein are Navalakṣavrata 1*a*, Candradīpadāna fol. 2*b*, Tilāyutahōmavidhi 3*b*, Sōmavāravratōdyāpana 4*a*, Dhanurmāsapūjāvidhi 5*a*, Budhāṣṭamīvratōdyāpana 6*b*, Dhāraṇapāraṇavrata 7*a*, Lakṣavartivrata 9*a*, Lakṣavartivratōdyāpana 18*a*, Viṣṇupañcakavrata 23*a*, Dhāraṇapāraṇavrata 28*a*, Varalaksmīvrata 30*a*, Mahālakṣmīvrata 36*a*, Ṛṣipañcamīvratōdyāpana 52*a*, Kṛṣṇajayantīvratakalpa 54*b*, Vināyakavrata 57*a*, Vāmanajayantīvratakalpa 66*a*, Śravaṇadvādaśīvratakalpa 68*a*, Dānaphalavrata 76*a*, Dānaphalavratōdyāpana 93*a*.

Complete. From Brahmāṇḍapurāṇa.

Similar to the above.

Beginning :

कश्यपश्च मुनिश्रेष्ठं तपोरूपमकल्मषम् ।
ब्रह्मणश्चात्मजं शान्तं वेदशास्त्रविशारदम् ॥

* * * *

शयीत ब्रह्मचर्येण ऋषीन् ध्यात्वा समाहिता ।
अनेन विधिना सप्त वर्षाणि व्रतमाचरेत् ॥

Colophon:

इति कश्यपादिसप्तर्षिपूजविधिः.

The remaining portion contains the story in respect of the Vrata; and this happens to be the same as the one described under No. 8231.

No. 8234. ऋषिपञ्चमीव्रतकल्पः.

RṢIPAÑCAMĪVRATAKALPAḤ

Pages, 20. Lines, 6 on a page.

Begins on fol. 101*a* of the MS. described under No. 8171.
Complete.
Similar to the above.

Beginning:

पूर्वेद्युरपरेद्युर्व्रतानुष्ठानम् । नित्यनैमित्तिकानुष्ठानं सर्वन्निर्वर्त्य पूर्ववद्देह-बाह्याभ्यन्तरतः शौचपुरस्सरं गङ्गादितीर्थेषु व्रताङ्गत्वेन स्नात्वा धौतवा-ससी परिधाय ललाटे तिलकं कृत्वा श्रोत्रियान् कुटुम्बिनो ब्राह्मणानाहूय यागमण्टपे समुपवेश्य सङ्कल्पं कृत्वा . . . . . ऋषिपूजामारभेत् तत्तन्नामाभिः पूजाङ्कुर्यात् ।

कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वसिष्ठश्च सप्तैत ऋषयस्स्मृताः ॥

गृहीत्वार्घ्यं मया दत्तं तुष्टा भवत सर्वदा । इत्यर्घ्यमन्त्रः ।

End:

व्रतेनानेन मे श्रेष्ठा यमेन नियमेन च ।
स्वीकृतं दुष्कृतं सर्वं व्यपोहतु सदा मम । प्रार्थना ।

Colophon:

इति ऋषिपूजा ॥

No. 8235. ऋषिपञ्चमीव्रतकल्पः.

RṢIPAÑCAMĪVRATAKALPAḤ.

Pages, 60. Lines, 5 on a page.

Begins on fol. 11*b* of the MS. described under No. 3375.
Complete.
Same as in the MS described under No. 8231.

No. 8236. ऋषिपञ्चमीव्रतकल्पः.

ṚṢIPAÑCAMĪVRATAKALPAḤ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 38*b* of the MS. described under No. 2907.

Complete.

Similar to the above.

Beginning:

सङ्कल्पपूर्वकं —

कश्यपञ्च मुनिश्रेष्ठं तपसा दग्धकल्मषम् ।
ब्रह्मणश्चाङ्गसम्भूतं वेदशास्त्रनिधिं परम् ॥
अत्रिं मुनिवरं शान्तं तपसा ज्ञानलोचनम् ।
वन्द्यमिन्द्रादिदेवानां सर्वशास्त्रविशारदम् ॥

* * * * *

कमण्डलुधरान् दिव्यान् जटाभरणभूषितान् ।
अक्षमालोज्ज्वलकरान् ध्यायेत् कश्यपपूर्वकान् ॥
कश्यपादिसमस्तऋषिभ्यो नमः—ध्यानम् ।

End:

यानि कानीति प्रदक्षिणम् । कश्यपोऽत्रिर्भरद्वाजेति नमस्कारः ॥

Colophon:

इति पूजाविधानं सम्पूर्णम् ॥

No. 8237. ऋषिपञ्चमीव्रतकल्पः.

ṚṢIPAÑCAMĪVRATAKALPAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 12*b* of the MS. described under No. 8177.

Complete.

Same as the above.

No 8238. ऋषिपञ्चमीव्रतकल्पः.
ṚṢIPAÑCAMĪVRATAKALPAḤ.

Substance, palm-leaf. Size, 16¾ × 1¾ inches. Pages, 16. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Svarṇagaurī-vratakalpa 9*a*.

Complete. From Bhaviṣyōttarapurāṇa.

Similar to the above.

Beginning:

सायंकाले नदीतीरं गत्वा स्नात्वा सङ्कल्प्य एवङ्गुणविशेषणविशिष्टायां शुभतिथौ . . . . . पुनरावृत्तिरहितशाश्वतपुण्यलोकनिवाससिद्ध्यर्थमृषिपञ्चमीव्रतं करिष्ये —

कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वसिष्ठश्च सप्तैत ऋषयः स्मृताः ॥
कश्यपादिसप्तर्षिभ्यो नमः—ध्यायामि ।

End: See under No. 8231.

Colophon:

इति भविष्योत्तरपुराणे ऋषिपञ्चमीव्रतकल्पस्सम्पूर्णः ॥
नभस्यासितपक्षे तु भानुवारेण संयुतम् ।
उत्तरातारसहितं ग्रन्थसम्पूर्णमुच्यते ॥

No. 8239. ऋषिपञ्चमीव्रतकल्पः.
ṚṢIPAÑCAMĪVRATAKALPAḤ.

Substance, palm-leaf. Size, 8½ × 1¼ inches. Pages, 45. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 70*b*. The other works herein are Daśāphalavrata 1*a*, Vināyakavrata 5*a*, Varalakṣmīvrata 14*b*, Daśāphalavrata 21*b*, Svarṇagaurīvrata 25*a*, Śanaiścaravrata 28*a*, Lakṣabilvavrata 42*a*, Vāmanajayantīvrata 43*b*, Dānaphalavrata 54*a*.

Complete.

Similar to the above.

Beginning:

एवङ्गुणविशेषणविशिष्टायां तिथौ . . . . . समस्त-पापक्षयार्थं ब्रह्माण्डपुराणोक्तप्रकारेणावाहनादिषोडशोपचारपूजां च (करिष्ये)। ऋषीन् ध्यात्वा ।

End: Same as that given under No. 8231 above.

Colophon:

इति भविष्योत्तरपुराणे ऋषिपञ्चमीव्रतकल्पः सम्पूर्णः ॥

No. **8240.** ऋषिपञ्चमीव्रतकल्पः.

RṢIPAÑCAMĪVRATAKALPAḤ.

Substance, palm-leaf. Size, $11\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 16. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 15*b*. The other works herein are Śravaṇadvādaśīvrata 1*a*, Sōmavāravratakalpa 24*a*.

Complete. From Brahmāṇḍapurāṇa.

Similar to the above.

Beginning:

एवङ्गुणविशेषणविशिष्टायां तिथौ . . . . . पुनरावृत्तिरहितशाश्वतब्रह्मलोकावाप्त्यर्थमृषिपञ्चमीव्रतं करिष्ये ।

कश्यपस्सर्वलोकाढ्यस्सर्वभूतेषु संस्थितः ।
नारायणः पापनाश ऋषिरूपेण संस्थितः ॥

* * * *

शतानीक उवाच—

श्रुतानि देवदेवेश व्रतानि सुबहूनि च ।

End:

रूपलावण्यसंयुक्ताः पुत्रपौत्रादिसम्पदः ।
व्रतस्यास्य प्रभावेण जातिं स्मरति पूर्विकाम् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे ऋषिपञ्चमीव्रतकल्पः सम्पूर्णः ॥

No. **8241.** ऋषिपञ्चमीव्रतकल्पः.

RṢIPAÑCAMĪVRATAKALPAḤ.

Pages, 19. Lines, 16 on a page.

Begins on fol. 23*a* of the MS. described under No. 3846.

Complete. From Bhavisyōttarapurāṇa.

Similar to the above.

Beginning:

आचम्य प्राणानायम्य सङ्कल्प्य . . . . . .
कश्यपादिसप्तर्षीनुद्दिश्य कश्यपादिसप्तर्षिप्रीत्यर्थं भविष्यत्पुराणोक्तप्रकारेण
ऋषिपञ्चमीव्रताङ्गत्वेन ध्यानावाहनादिषोडशोपचारपूजां करिष्ये ।

* * * *

कमण्डलुधरान् दिव्यान् जटाभारविशोभितान् ।
अक्षमालोज्ज्वलकरान् ध्यायेत्कश्यपपूर्वकान् ॥
कश्यपादिसप्तऋषिभ्यो नमः—ध्यानम् ।

End:

कामात्कामकृतं पापं तत्क्षणादेव नश्यति ।
निर्मुक्तोऽनेन पापेन जन्मान्तरसहस्रजे(के) ॥

Colophon:

इति भविष्योत्तरपुराणे ऋषिपञ्चमीव्रतकल्पः सम्पूर्णः ॥

No. **8242.** ऋषिपञ्चमीव्रतकल्पः.

RṢIPAÑCAMĪVRATAKALPAḤ.

Pages, 34. Lines, 8 on a page.

Begins on fol. 91*a* of the MS. described under No. 8177.

Complete.

Same as the above.

No. 8243. ऋषिपञ्चमीव्रतकल्पः.

ṚṢIPAÑCAMĪVRATAKALPAḤ.

Pages, 15. Lines, 5 on a page.

Begins on fol. 65*b* of the MS described under No. 8179.

Complete.

Same as the above.

No. 8244. ऋषिपञ्चमीव्रतकल्पः.

ṚṢIPAÑCAMĪVRATAKALPAḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 12*a* of the MS. described under No. 3105.

Complete.

Same as the above.

No. 8245. ऋषिपञ्चमीव्रतकल्पः.

ṚṢIPAÑCAMĪVRATAKALPAḤ.

Pages, 13. Lines, 6 on a page.

Begins on fol. 92*b* of the MS. described under No. 2908.

Complete. From Brahmāṇḍapurāṇa.

Similar to the above.

Beginning:

कश्यपस्सर्वलोकाढ्यः सर्वभूतेषु संस्थितः ।
अष्टयोगबलेनैव सृष्टिस्थित्यन्तकारणम् ॥
अग्निहोत्ररतं शान्तं सत्यधर्मपरायणम् ।
षट्कर्मनिरतं शान्तम् अर्चयेदत्रिमव्ययम् ॥

End:

य इदं शृणुयाद्वापि श्रावयेद्वा समाहितः ।
ज्ञानाज्ञानकृतं पापं तत्क्षणादेव नश्यति ॥

* * * * *

Colophon:

इति ब्रह्माण्डपुराणे ब्रह्मशाश्वतसंवादे ऋषिपञ्चमीव्रतकल्पः सम्पूर्णः ॥

No. 8246. ऋषिपञ्चमीव्रतकल्पः.
ṚṢIPAÑCAMĪVRATAKALPAḤ.

Pages, 22. Lines, 6 on a page.

Begins on fol. 8*a* of the MS. described under No. 2488· wherein the Pūjā and the Kathā (story) in respect of this Vrata are shown as separate works beginning on fols. 8*a* and 10*a* respectively.

Incomplete.

Beginning:

आवाहनाद्यर्घ्य . . . . र्सवज्ञानविशारदाः ।
पूजां सर्वस्य लोकस्य व्रतसाद्गुण्यकारक ॥ आवाहनम् ।
सुवर्णघटितं दिव्यं नानारत्नसमन्वितम् ।
आसनं कल्पितं दिव्यमर्पितं ते मुनीश्वर ॥ आसनम् ।
गङ्गाजलं समानीतं सुगन्धद्रव्यसंयुतम् ।
आगम्य प्रतिगृह्याथ(ह्वीत)कश्यपाद्या महर्षयः ॥ पाद्यम् ।

End:

दृष्ट्वा व्रतप्रभावेण ज्ञानाद् द्विजकुलेऽमला ।
अवसाने व्रतस्यास्य क्रिमिराशिरभूच्च सा ॥

No. 8247. ऋषिपञ्चमीव्रतकल्पः.
ṚṢIPAÑCAMĪVRATAKALPAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 141*a* of the MS. described under No. 7758.

Wants beginning.

Similar to the above.

Beginning:

भ (ब्रह्मा) उवाच—

स्नुषार्जितं तु यत्पुण्यं पूर्वजन्मनि साश्चितम् ।
ऋषिव्रतसमुद्भूतमावाभ्यां यदि दीयते ॥

तेन पुण्यस्य लाभेन स्वर्गप्राप्तिश्च शाश्वती ।
इति तद्वचनं श्रुत्वा भार्यामाहूय सादरम् ॥
पुण्यं प्रदापयामास धर्मपालो दयान्वितः ।
तेनामितप्रभावेण व्रतस्य पितरौ तदा ॥

End:

सम्यक् ऋषीणां च तपोधनानां व्रतेन साङ्गेन मनुष्यलोके ।
निस्तीर्य नार्यो निहितं च पापं लोके हि यस्मिन्नुपयाति(न्त)सौख्यम् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे ऋषिपञ्चमीव्रतं संपूर्णम् ॥

यस्य स्मृत्येत्युक्त्वा आचार्यप्रमुखान् वस्त्रादिभिः परितोष्य यथासम्भवं ब्राह्मणान् भोजयित्वा विसर्जयेत् । इष्टमित्रपुरस्सरं भोक्तव्यम् । अथ शयनब्रह्मचर्यं चरेत्—इतीयती रीतिः ॥

No. 8248. ऋषिपञ्चमीव्रतोद्यापनम्.
ṚṢIPAÑCAMÎVRATŌDYĀPANAM.

Pages, 9. Lines, 6 on a page.

Begins on fol. 12*a* of the MS. described under No. 8188.

Complete.

On the manner of completing the observance of the Vrata. This is generally done at the end of an observance of seven years; but the completion ceremony may also be performed in the beginning as well as in the middle of the period of observance according to the resources of the person carrying out the Vrata.

Beginning:

अथ ऋषिपञ्चम्युद्यापनविधिरुच्यते ।

ब्रह्मोवाच—

वर्षे तु सप्तमे कुर्यादुद्यापनविधिक्रियाम् ।
मध्य उद्यापनं कुर्याद्यथावित्तानुसारतः ॥

आद्ये मध्ये तथा चान्ते कुर्यादुद्यापनक्रियाम् ।
पूर्वेद्युःस्यादेकभुक्तं दन्तधावनपूर्वकम् ।
[अ]परेद्युः कृतः (प्रातरुत्थाय)नित्यकर्म निवर्त्य च ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रावापि वरानने ॥
व्रताङ्गत्वेन नद्यादौ ऋषिध्यानपरायणाः ॥

End :

व्रतं समापयाम्यद्य क्षमध्वं मुनिपुङ्गवाः ॥

इत्येतैर्मन्त्रैः प्रतिमादानं कृत्वा दक्षिणां दत्वा कथां श्रुत्वा ब्राह्मणान् भोजयित्वा क्षमाप्य विसर्जयेत् ॥

Colophon :

इति ऋषिपञ्चमीव्रतोद्यापनविधिस्समाप्तः ॥

No. **8249.** ऋषिपञ्चमीव्रतोद्यापनम्.

RṢIPAÑCAMĪVRATŌDYĀPANAM.

Pages, 14. Lines, 7 on a page.

Begins on fol. 28*a* of the MS. described under No. 8188.

Incomplete.

Same as the above

No. **8250.** ऋषिपञ्चमीव्रतोद्यापनम्.

RṢIPAÑCAMĪVRATŌDYĀPANAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 52*a* of the MS. described under No. 8233.

Complete.

Similar to the above.

Beginning :

व्रतकर्ता पूर्वेद्युर्दन्तधावनपूर्वकं स्नात्वा एकभुक्तं हविष्यं भुक्त्वा नियमेन स्थित्वा प्रातरुत्थाय स्नात्वा धौतवासाः.

ललाटे तिलकं कृत्वा ऋषिध्यानपरायणः ।
वेदिं सम्यक् प्रकुर्वीत गोमयेनोपलिप्य च ॥
रङ्गवल्लीसमायुक्तां नानारत्नोपशोभिताम् ।
धान्यराशिं प्रकल्प्याथ अष्टौ कुम्भान्निधाय च ॥

End:

अरुन्धती प्रतिगृह्णाति ।
व्रतं निर्वर्तितं साङ्गं क्षमध्वमृषिपुङ्गवाः ॥
व्रतेनानेन तेनैव यमेन नियमेन च ।
कामकारकृतं पापं व्यपोहतु सदा मम ॥

Colophon:

इत्युद्यापनाङ्गदानमन्त्राः ॥

No. **8251.** ऋषिपञ्चमीव्रतोद्यापनम्.
ṚṢIPAÑCAMĪVRATŌDYĀPANAM.

Pages, 5. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 3055

Incomplete.

Same as the above.

No. **8252.** ऋषिपञ्चमीव्रतोद्यापनम्.
ṚṢIPAÑCAMĪVRATŌDYĀPANAM.

Pages, 19. Lines, 7 on a page.

Begins on fol. 16*a* of the MS. described under No. 3105.

Complete.

Similar to the above.

Beginning:

एवंगुणविशेषणविशिष्टायां तिथौ मम इह जन्मनि जन्मान्तरेषु . . . . . ब्रह्माण्डपुराणोक्तऋषिपञ्चमीव्रतोद्यापनं कर्तुं स्थलमण्डपद्रव्यशुद्ध्यर्थं देवयजनसिद्ध्यर्थमात्मशुद्ध्यर्थं वृद्ध्यर्थं महाजनैस्सह

स्वस्तिपुण्याहवाचनं करिष्ये—इति संकल्प्य स्वस्तिवाचनानन्तरमाचार्यादिऋत्विग्वरणं कुर्यात् ।

End:

वसिष्ठ त्वं द्विजश्रेष्ठ सर्वलोकोपकारक ।
गृहीत्वा स्वर्चितां दिव्यां प्रतिमां मे सुखं कुरु ॥
वसिष्ठः प्रतिगृह्णातु(ति) वसिष्ठो वै ददाति च ।
वसिष्ठस्तारकोभाभ्यां वसिष्ठाय नमो नमः ॥

Colophon:

इति श्रीऋषिपञ्चमीव्रतोद्यापनं समाप्तम् ॥

No. **8253.** ऋषिपञ्चमीव्रतोद्यापनम्.

RṢIPAÑCAMĪVRATŌDYĀPANAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 6*a* of the MS. described under No. 8232.

Complete.

Similar to the above.

Beginning:

त्वत्प्रसादाद्दर्षिश्रेष्ठ श्रुतं मे व्रतमुत्तमम् ।
इदानीं कृपया ब्रूहि व्रतस्योद्यापनं विभो ॥

* * * *

शृणु शीले प्रवक्ष्यामि व्रतोद्यापनमुत्तमम् ।
कृते च चित्तशीलेन गोमयेन विलिप्यते ॥
स्वस्तिकेसरवांस्तत्र सर्वतोभद्र एव च ।
तस्योपरि न्यसेत्कुम्भं स्वर्णरत्नोपशोभितम् ॥
स्वशक्त्या रजतं कुर्यात्तस्य यत्नेन ताम्रकम् ।
कुर्याच्च व्रतवान् भक्त्या वित्तशाठ्यन्न कारयेत् ॥

End:

वृत्वा सपत्निकान् सर्वान् ब्राह्मणान् सप्तसङ्ख्यया ।
तेभ्यस्तु कलशान् दद्यादपूपान् सप्तसङ्ख्यया ॥

वेणुपात्रे विनिक्षिप्य क्रमुकान् सप्तसङ्ख्यया ।
ब्रह्मसूत्रं ततो दद्याच्छ्रोत्रियाय कुटुम्बिने ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे ऋषिपञ्चमीव्रतोद्यापनविधिस्समाप्तः ॥

No. 8254. एकादशीगुरुवारव्रतकल्पः.

EKĀDAŚĪGURUVĀRAVRATAKALPAḤ.

Pages, 8. Lines, 8 on a page.

Begins on fol. 72*a* of the MS. described under No. 5765

Complete.

On the observance of certain rites when Ekādaśī falls on a Thursday. This Vrata is intended to propitiate God Nārāyaṇa and to remove the pollution caused by the touch of women in menses.

Beginning:

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ . . . . . लक्ष्मीनारायणप्रीत्यर्थमेकादशीगुरुवारव्रतं करिष्ये । तदङ्गकलशपूजाञ्च करिष्ये । ततो गणाधिपतिपूजाङ्कुर्यात् ।

लक्ष्मीनारायणन्देवं शङ्खचक्रगदाधरम् ।
पीताम्बरधरं विष्णुं त्रैलोक्यपरिपूजितम् ॥
रमापतिं महादेवं वाञ्छिताभीष्टसिद्धये । इति ध्यानम् ।

* * * *

प्रदक्षिणत्रयन्देव नारायण रमापते ।
करोमि परया भक्त्या पापं हरतु मे सदा ॥
प्रदक्षिणनमस्कारान् ।
यस्य स्मृत्या च नामोक्त्या . . . ॥
आचरितव्रतकल्पोक्तसम्पूर्णफलावाप्तिरस्तु ॥

Colophon :

इति पूजाविधानं सम्पूर्णम् ॥

युधिष्ठिर उवाच—

रजस्वलायुता नारी सर्वस्पृष्टागता तथा ।
तद्दोषशमनार्थाय व्रतं ब्रूहि जनार्दन ॥

श्रीकृष्ण उवाच—

तच्छान्तिं तव वक्ष्यामि श्रोतुमर्हति भारत ।
पुरा कृतयुगे राजन्नयोध्यायां महापुरे ॥
तस्मिन् देशेऽभवद्विद्वान् वेदवेदान्तपारगः ।
सुमन्त्रो नाम विप्रेन्द्रः श्रीमान् धर्मपरायणः ॥

En

व्रतं कुर्याद्विधानेन कु(गु)रुसंपर्कदोषजं(तः) ।
तस्य पापानि नश्यन्ति व्रतस्यास्य प्रभावतः ॥

Colophon :

इति भविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे एकादशीगुरुवारव्रतं सम्पूर्णम् ॥

No. 8255. एकादशीव्रतकथा.
ĒKĀDAŚĪVRATAKATHĀ.

Pages, 7. Lines, 8 on a page.

Begins on fol. 78*b* of the MS. described under No. 3105.

Complete. From the Matsyapurāṇa

On the importance of the Ēkādaśī Vrata and on the manner of observing it.

Beginning :

अर्जुन उवाच—

उपवासस्य नक्तस्य एकभुक्तस्य किं प्रभो ।
किं पुण्यं किं विधानं हि ब्रूहि सर्वं जनार्दन ॥

श्रीभगवानुवाच—

हेमन्ते चैव संप्राप्ते मासि मार्गशिरे शुभे ।
शुक्लपक्षे तथा पार्थ समुपोष्या च द्वादशी ॥
दशम्याञ्चैव नक्तन्तु यत्किञ्चित् सुदृढव्रतम् ।
नक्तञ्च तद्दिने कृत्वा दशम्यां दन्तधावनम् ॥
विष्णुधर्मसमं नास्ति . . . . . धनञ्जय ।

End :

एकादशीसमं नास्ति व्रतं नाम सनातनम् ।

Colophon :

इति मात्स्ये एकादशीव्रतकथा सम्पूर्णा ॥

No. 8256. एकादशीव्रतकल्पः.

ĒKĀDAŚĪVRATAKALPAḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 5*a* of the MS. described under No. 7758.

Complete.

On the observance of certain rites on the eleventh day of the bright and dark fortnights in the lunar month, the chief item being the worship of Viṣṇu.

Beginning :

स्कन्दपुराणोक्तप्रकारेण एकादशीव्रताङ्गत्वेन ध्यानावाहनादिषोडशोपचारपूजां करिष्ये ।

पीताम्बरधरं विष्णुं वनमालाविभूषितम् ।
श्रीवत्साङ्कं जगद्बीजं श्रीधरं श्रीपतिं हरिम् । श्रीकृष्णाय नमः ध्यानं समर्पयामि ।

मुकुन्दमण्टपं दिव्यं चतुरश्रं सुशोभितम् ।
महामाणिक्यवैडूर्यकाञ्चनैस्तोरणादिभिः ॥

End:

आपक्षीरकुशाग्राणि(दि)गन्धपुष्पैश्च संयुतम् ।
शङ्खे च पूरितं पूर्वं गृहाणार्घ्यं नमोऽस्तु ते । अर्घ्यम् ॥
नमस्ते सर्वलोकेश भक्ताभीष्टप्रदायक ।
वाञ्छितं कुरु मे देव वासुदेव नमोऽस्तु ते । नमस्कारः ॥

Colophon:

इति एकादशीकल्पं संपूर्णम् ॥

No. 8257. एकादशीव्रतपूजा.
ĒKĀDAŚĪVRATAPŪJĀ.

Pages, 2. Lines, 12 on a page.

Begins on fol. 5*a* of the MS. described under No. 8198.

On the worship to be conducted in relation to the Ēkādaśī-vrata.

Beginning:

चतुर्भुजमुदाराङ्गं शेषपर्यङ्कशायिनम् ।
सलक्ष्मीकं स्यनाधात्रीं(सधात्रीकं)चिन्तयेद्गरुडध्वजम् । ध्यानम् ॥
सत्यादित्य सहस्राक्षनित्यार्चितपदाम्बुज[म्] ।
आगच्छ पूजां गृह्णीष्व महर्षीणां कृपाकर । आवाहनम् ॥

End:

एकादश्यां समुत्थेन वह्निना पातकेन्धनम् ।
दग्धा पातकनिर्मुक्तः कृष्णायार्घ्यन्ददाम्यहम् ॥ अर्घ्यम् ।
अज्ञानतिमिरान्धस्य व्रतेनानेन केशव ।
प्रसीद सुमुखो नाथ ज्ञानपुष्टिप्रदो भव । प्रार्थना ॥
एकादश्यां न भोक्ष्यामि न स्वया(प्स्या)मि जगत्पते ।
श्वो भोक्ष्ये देवदेवेश अर्पयामि जनार्दन । इति उपवाससमर्पणम् ॥

Colophon:

इति एकादशीकल्पं सम्पूर्णम् ।

No. 8258. एकादशीव्रतपूजा.
ĒKĀDAŚĪVRATAPŪJĀ.

Substance, palm-leaf. Size, 14 × 1⅛ inches. Pages, 5. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance old.

Begins on fol. 26*a*. The other works herein are Mahādēvāṣṭōttaraśatanāmastōtram 1*a*, Vināyakavratapūjā 2*a*, Balīndrapūjā 5*b*, Śāradāvratapūjā 6*b*, Kṛṣṇajayantīvratapūjā 10*a*, Vāmanajayantīvratapūjā 13*a*, Rāmajayantīvratapūjā 14*a*, Ṇṛsiṁhajayantī vratapūjā 17*a*, Śravaṇadvādaśīvratapūjā 18*b*, Sōmavāravratapūjā 21*a*, Śivarātrivratapūjā 24*a*.

Complete.

Similar to the above.

Beginning:

पूर्वोक्तैवङ्गुणविशेषणविशिष्टायां पुण्यतिथौ अस्मत्समस्तपापक्षयार्थमेकादशीपूजां करिष्ये—

चतुर्भुजमुदाराङ्गं शेषपर्यङ्कशायिनम् ।
सलक्ष्मीकं मुरारातिं हतारिं चिन्तयेद्धरिम् ॥

हरये नमः—ध्यानम् ।

End:

एकादश्यां समुत्थेन वह्निपातेन रन्धनम् ।
पक्षपापविशुद्ध्यर्थं तेन पापं हरन्तु मे ॥ इदमर्घ्यम ।
शङ्खतोयं समादाय दत्वोदयजनं ददत् ।

Colophon:

एकादशीकल्पस्सम्पूर्णः ॥

No. 8259. एकादशीव्रतोद्यापनम्.
ĒKĀDAŚĪVRATŌDYĀPANAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 76*a* of the MS. described under No. 3105.

Complete. Forms the 24th Adhyāya of Viṣṇudharmōttara.

On the manner of completing the Ēkādaśīvrata.

Beginning:

अथैकादशीव्रतोद्यापनम् ।

अर्जुन उवाच—

कीदृक् व्रतविसर्गोऽत्र विधानं चात्र कीदृशम् ।
संपूर्णं हि भवेद्येन तन्मे वद कृपानिधे ॥

श्रीकृष्ण उवाच—

शृणु पाण्डव यत्नेन प्रवक्ष्यामि तदव्ययम् ।
तद्रूपविधिमप्यस्य कथयामि तवाग्रतः ॥

यानि कष्टेन चीर्णानि व्रतानि कुरुसत्तम ।
विफलान्येव सर्वाणि उद्यापनविधिं विना ॥

प्रबोधसमये पार्थ कुर्यादुद्यापनाक्रियाम् ।
मार्गशीर्षे विशेषेण माघे भीष्मतिथावपि ॥

End:

उत्पत्तिं यः शृणोत्येवमेकादश्यां द्विजोत्तम ।
भुक्त्वा भोगाननेकांस्तु विष्णुलोकं प्रयाति सः ॥

Colophon:

इति विष्णुधर्मोत्तरे एकादशीमाहात्म्ये चतुर्विंशतितमोऽध्यायः ॥

No. 8260. कदलीविवाहविधिः.

KADALĪVIVĀHAVIDHIḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 21*a* of the MS. described under No. 8200.

Complete.

On the manner of marrying a person to a plantain tree. This kind of marriage is prescribed for the eldest member of a family who is unable to get a bride in consequence of his being a leper or a mute, blind or deaf person. The rule of not performin ; the

marriage of a younger brother when the elder is unmarried is obviously responsible for this device.

Beginning:

अथ कदलीविवाहमाह—

ज्येष्ठे तु कुष्ठरोगी स्याद्भ्रष्टषण्डस्तथैव च ।
जात्यन्धोऽङ्गविहीनश्च मूको बधिर एव च ॥
एतेभ्यो न ददुः कन्यां रम्भोद्वाहं (हो) विधीयते ।
कनीयान् कन्यकोढी स्यात्कदलीं नववाससा ॥
आच्छाद्य तूष्णीं वैदिका (वेद्या)च निधायाङ्कुरपूर्वकम् ।

End:

एवं च विधिना कृत्वा श्राद्धान्तं च समाचरेत् ।
इत्याह भगवान् व्यासो वै लोकसङ्ग्रहणाय च ॥

Colophon:

इति रम्भोद्वाहस्समाप्तः ॥

No. 8261. कदलीव्रतकल्पः.

KADALĪVRATAKALPAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 47*b* of the MS. described under No. 3105.

Complete.

Deals with the Vrata which consists in the worship of the plantain tree on the fourteenth day of the bright fortnight in the month of Bhādrapada. This Vrata is observed with a view to obtain long life, and prosperity. A story in illustration of the importance of the Vrata is also given.

Beginning:

भाद्रशुक्लचतुर्दश्यां कदलीव्रतम् । हेमाद्रौ भविष्ये—

यत् प्रसिद्ध्या समाख्यातं कदलीव्रतमुत्तमम् ।
तत्तेऽहं संप्रवक्ष्यामि लोकानुग्रहकाङ्क्षया ॥

नाकपृष्ठे पुरा देवैः गन्धर्वैर्यक्षकिन्नरैः ॥
अप्सरोऽमरकन्याभिः नागकन्याभिरर्चिता ॥

* * * *

कीर्तयेत् कदळीं नित्यं तद्दलैः कामदीपितैः ॥
शरीरारोग्यलावण्यं देहि देवि नमोऽस्तु ते ।
दुर्गता दुर्भगा व्यङ्गा स्वैरिणी पापचारिणी ॥
भवेत्सौभाग्यसौख्याढ्या पुत्रपौत्रश्रिया युता ।
आयुष्मती जीववत्सा जीवेद्वर्षशतं भुवि ॥

Colophon :

इति कदलीव्रतम् ॥

* * * *

कदलीव्रतकथा ।

युधिष्ठिर उवाच—अथ घूर्जराचारप्राप्तं कार्त्तिक्यां माघ्यां वैशाख्यां वा कदलीव्रतम् । तत्कदलीपूजनम्—

कृष्ण कृष्ण महाबाहो सर्वविद्याविशारद ।
अनाथनाथ विश्वात्मन् दीनदैन्यनिकृन्तन ॥
त्वमस्माकं परो बन्धुस्त्वमस्माकं परस्सखा ।
त्वयाभिरक्षिता नित्यं विचरामोऽत्र निर्भयाः ॥
किंचित् पृच्छामि देवेश कृपां कुरु वदस्व मे ।
यद्गुह्यं सर्वधर्मेषु कृते यस्मिन् महत् फलम् ॥
सौभाग्यारोग्यदं पुण्यं धनधान्याभिवृद्धिदम् ॥

* * * *

श्रीकृष्ण उवाच—

शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ॥
यत् कृत्वा सर्वदुःखेभ्यो नारी मुच्येत संकटात् ॥

* * * *

एवं यः कुरुते देवि कदलीव्रतमुत्तमम् ।
तस्मात् कुरु विधानेन यथोक्तफलमाप्स्यसि ॥

End:

तावद्भूव वस्त्राणि कदलीगर्भवन्नृप ।
इत्थं व्रतप्रभावोऽयं गुह्योऽपि कथितो मया ॥
कारयस्व विधानेन पूर्णकामो भविष्यसि ॥

No. 8262. कदलीव्रतम्.
KADALĪVRATAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 50*b* of the MS. described under No. 3105, wherein this is wrongly entered as Kadalīvratōdyāpanam.

Complete. From Bhaviṣyōttarapurāna.

Similar to the above; but the months in which the Vrata should be observed are given here as Kārtika, Māgha or Vaiśākha.

Beginning:

युधिष्ठिर उवाच—
कस्मिन् मासे तिथौ कस्यामाचरेद्व्रतमुत्तमम् ।
कथंभावेन किं कार्यं तन्ममाचक्ष्व केशव ॥

कृष्ण उवाच—
कार्त्तिके माघमासे वा वैशाखे . . . . . ।
पुण्ये मासि प्रकुर्वीत पौर्णमास्यां शुभे दिने ॥

End:

एवं नारी नरो वापि यः कुर्यात् कदलीव्रतम् ।
सर्वान् कामानवाप्नोति स्वर्गलोके महीयते ॥

Colophon:

इति भविष्योत्तरे कदलीव्रतम् ॥

No. 8263. काम्यवृषोत्सर्जनम्.
KĀMYAVṚṢŌTSARJANAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 18*a* of the MS. described under No. 8219.

Complete.

On the rites connected with the gift of a bull This Vrata is observed on the full moon day in the months of Caitra, Vaiśākha, Śrāvaṇa or Kārtika; and it is considered to have the power of enabling one to realise one's objects, such as the birth of children, freedom from disease and sin, the attainment of salvation, etc.

Beginning:

वृषोत्सर्जनं व्याख्यास्यामः—

उदगयने मासे चैत्रे वैशाखे श्रावणे कार्त्तिक्यां वा पौर्णमास्यां कुर्यात्। सन्तानार्थी दीर्घरोगार्थी(र्तः) पापक्षयार्थे मोक्षार्थी च कुर्यात्. पूर्वेद्युः रात्रावुपवासः, प्रभाते महानद्यां स्नात्वा . . . . . । एकादशरुद्रप्रीत्यर्थं मोक्षसा—र्थं वृषोत्सर्जनं करिष्ये। अभ्युदयं पुण्याहं कृत्वा.

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते॥ इत्युक्तलक्षणम्।

End:

दश दानानि भूरिदानानि इतरदानानि दद्यात्।

पायसान्नेन ब्राह्मणान् भोजयेत्। उक्तलक्षणाभावे सर्वकृष्णरूपं वा वृषमुत्सृजेत्—इत्याह भगवान् बोधायनः॥

No. 8264. कार्त्तिकमासनक्तपूजाविधिः.

KĀRTTIKAMĀSANAKTAPŪJĀVIDHIḤ.

Pages, 11. Lines, 17 on a page.

Begins on fol. 77*a* of the MS. described under No. 3846.

Complete. From Skāndapurāṇa.

On the Vrata which consists in the worship of God Śiva during nights in the month of Kārtika. This is observed with a view to get rid of sins.

Beginning:

पूर्वोक्तैवङ्गुणविशेषणविशिष्टायां शुभतिथौ उमामहेश्वरमुद्दिश्य उमामहेश्वरप्रीत्यर्थं स्कान्दपुराणोक्तप्रकारेण कार्त्तिकमासनक्तपूजां करिष्ये।

कार्त्तिके मासि देवेश नक्तव्रतविधानतः ।
वक्ष्यामि देवदेवेश अर्पयामि सदाशिव ॥

* * * *

नक्तव्रतं महादेव करिष्ये तव सन्निधौ ।
तव विघ्नेश सम्पूर्णं समाप्य त्वत्प्रसादतः ॥
इति ध्यात्वा पीठपूजां कुर्यात् ।

End:

यन्मयाचरितं पापं बाल्ययौवनवार्धके ।
उपसंहर विश्वेश मासनक्तव्रते तव ॥ प्रार्थना ।
चारात्मकं चराचरात्मको लिङ्गरूपी दिशतु वाञ्छितम् ।

दीपदानमन्त्रः—

सर्वतेजस्करानन्त पार्वतीश मया त्वया ।
दीपं गृहाण भगवन् तेजोरूप नमोऽस्तु ते ॥

Colophon:

श्रीस्कान्दपुराणोक्तप्रकारेण कार्त्तिकमासनक्तव्रतं सम्पूर्णम् ॥

No. 8265. कार्त्तिकशुक्लचतुर्दशीव्रतकथा.

KĀRTTIKAŚUKLACATURDAŚĪVRATAKATHĀ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 55*a* of the MS. described under No. 3105, wherein this is called Kārttikaśuklavaikuṇṭhacaturdaśī.

Complete.

On the Vrata which consists in the worship of Śiva on the fourteenth day of the bright fortnight in the month of Kārtika.

Beginning:

वर्षे वै हेमलम्बाख्ये मासि श्रीमति कार्त्तिके ।
शुक्लपक्षे चतुर्दश्यामरुणाभ्युदयं प्रति ॥

महादेवतिथौ ब्राह्मे मुहूर्ते मणिकर्णिके ।
स्नात्वा विश्वेश्वरो देव्या विश्वेश्वरमपूजयत् ॥

* * *

ततः परमृषिगणाः सर्वेऽपि मदनुग्रहात् ।
सम्पूज्य निशि यत्नेन चक्रुर्जागरणं शिवे ॥
कार्त्तिकस्य चतुर्दश्यां बिल्वैश्च कनकाह्वयैः ॥
द्रोणपुष्पैश्च पूजाञ्च चक्रुर्मयि महेश्वरे ॥

End :

पुण्येऽस्मिन् कार्त्तिके मासि सोमवारेषु शङ्करम् ।
उपोष्याभ्यर्चयेत्प्रीत्या निशि यामचतुष्टये ॥
ऊर्जशुक्लचतुर्दश्यां काश्यां विश्वेश्वरं प्रभुम् ।
समर्चयितुमिन्द्राद्यैः गम्यतेऽस्माभिरादरात् ॥ इत्यादि ।

Colophon :

इति वैकुण्ठचतुर्दशी ॥

No. 8266. कृष्णजयन्तीव्रतकल्पः.

KṚṢṆAJAYANTĪVRATAKALPAḤ.

Pages, 19. Lines, 5 on a page.

Begins on fol. 89*a* of the MS. described under No. 8171.

Complete. Forms the 40th Adhyāya of Brahmasaṁhitā.

On the Vrata which consists in the worship of God Śrīkṛṣṇa on the anniversary day of his birth, which generally comes off every year on the eighth day of the dark fortnight in the month of Śrāvaṇa. The observance of this Vrata is considered to enable one to realise all desired objects.

Beginning :

अतसीपुष्पसङ्काशं चतुर्बाहुं सुलोचनम् ।
देवक्या सहितं कृष्णं चिन्तयेद्गरुडध्वजम् ॥ ध्यानम् ।

आगच्छ जगदाधार कारुण्यामृतसागर ।
सत्याय सत्यपतये गोविन्दाय नमो नमः ॥ आवाहनम् ।

* * * *

गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे ।
देवकीसहिताय श्रीकृष्णाय नमः इदमर्घ्यम् ॥
कथा ब्रह्मोवाच ---
शृणु वत्स प्रवक्ष्यामि कृष्णजन्ममहोत्सवम् ।
यत्कृत्वा सर्वकाम्यांश्च लभते नात्र संशयः ॥
सिंहराशिगते सूर्ये श्रावणे मासि नारद ।
कृष्णपक्षे समाष्टम्यां बुधवारे निशार्धके ॥

End :

कुर्यात्कृष्णार्चनान्ते वा न कुर्यान्निशि पारणम् ।
एवं जयन्त्यां विधिवदुपवासार्चनादिक ॥

Colophon :

इति ब्रह्मसंहितायामुत्तरभागे अवतारदिनोत्सवप्रकरणे कृष्णजन्मदिनजयन्त्युत्सवो नाम चत्वारिंशोऽध्यायः ॥

No. 8267. कृष्णजयन्तीव्रतकल्पः.

KṚṢṆAJAYANTĪVRATAKALPAḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 54*b* of the MS. described under No. 8233.

Complete.

Similar to the above.

Beginning :

अद्य स्थित्वा निराहारः श्वोभूते पुरुषोत्तम ।
भोक्ष्यामि देवकीपुत्र अस्मिन् जन्माष्टमीव्रते ॥
देवीं स्वच्छाम्बरयुतां सर्वाभरणभूषिताम् ।
श्रीकृष्णवदनाम्भोजे निक्षिप्य कुचमण्डले(लम्) ॥

* * * *

अतस्त्वां पूजयिष्यामि मातुरुत्सङ्गसंस्थितम् ।
श्रीकृष्णं बलभद्रञ्च वसुदेवञ्च देवकीम् ॥
नन्दगोपं यशोदाञ्च सुभद्राञ्चैव रोहिणीम् ।
अतसीपुष्पसङ्काशं चतुर्बाहुं शुभेक्षणम् ॥
देवक्यङ्कस्थितं कृष्णं चिन्तयेद्गरुडध्वजम् । ध्यानम् ।

End:

गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे । देवकीसहिताय श्रीकृष्णाय इदमर्घ्यम् ॥

पुष्कराक्ष निमग्नोऽहं देवदेव जगद्गुरो ।
त्राहि मान्देवदेवेश हरे संसारसागरात् ॥ प्रार्थनम् ।
अद्य स्थित्वा निराहारः श्वोभूते पुरुषोत्तम ।
भोक्ष्यामि देवकीपुत्र अस्मिन् जन्माष्टमीव्रते ॥

Colophon:

इति पूजाविधिः ॥

No. **8268.** कृष्णजयन्तीव्रतकल्पः.

KṚṢṆAJAYANTĪVRATAKALPAḤ.

Pages, 14. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 8166.

Complete.

Similar to the above.

See under the previous number for the Beginning.

End:

ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषां पते ।
नमस्ते रोहिणीकान्त सुधाकुम्भ नमोऽस्तु ते ॥ चन्द्रार्घ्यम्—
क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव ।
पीयूषधामन् रोहिण्या सहि(तो)ऽर्घ्यं गृहाण मे ॥

Colophon:

समाप्तः ॥

No. 8269. कृष्णजयन्तीव्रतकल्पः.

KṚṢṆAJAYANTĪVRATAKALPAḤ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 21*a* of the MS. described under No. 8180.
Complete. From Brahmāṇḍapurāṇa
Similar to the above.

Beginning:

शुक्लाम्बरधरं. . . . . शान्तये ॥

कृष्णपूजा प्राणप्रतिष्ठा । स्कान्दे--

प्राजापत्येन संयुक्ता अष्टमी लभ्यते यदि ।
कृष्णा बहुफला सा तु सर्वपापविनाशिनी ॥

तत्रैव नित्यं कर्तव्यं दृश्यते विष्णुकर्मणि ।
दानं व्रतञ्च होमञ्च उपवासस्तथैव च ॥
बहुपुण्या बहुफला सर्वपापप्रणाशिनी ।

* * * *

कृष्णं च बलभद्रं च वसुदेवं च देवकीम् ।
रोहिणीं च सुभद्रां च यशोदां नन्दमेव च ॥
दुर्गां चैव मुनिश्रेष्ठ पूजयेच्च विचक्षणः ।

End:

कृष्णजन्माष्टमीं त्यक्त्वा यो न व्रतपरो भवेत् ।
प्राप्नोति न फलं किञ्चित् इष्टापूर्तं न च क्वचित् ॥
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सिध्यन्ति सर्वकार्याणि वासुदेवप्रसादतः ॥

Colophon:

इति ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे कृष्णजयन्तीव्रतकल्पं सम्पूर्णम् ॥

No. 8270. कृष्णजयन्तीव्रतकल्पः.

KṚṢṆAJAYANTĪVRATAKALPAḤ.

Pages, 17. Lines, 5 on a page.

Begins on fol. 67*a* of the MS. described under No. 8177.

Complete.

Similar to the above.

Beginning:

अद्य स्थित्वा निराहारः श्वोभूते पुरुषोत्तम ।
भोक्ष्यामि देवकीपुत्र जयक्ष्यां(न्त्यां) समुपोषणे ॥
एतद्व्रतार्थं त्वां(देव)वसुदेवकुलोद्भव ।
पूजयामि यथा शक्त्या प्रसीद पुरुषोत्तम ॥

End:

कौरवाणां विनाशाय वसुदेवकुलोद्भव ।
गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे ॥

No. 8271. कृष्णजयन्तीव्रतकल्पः.

KṚṢṆAJAYANTĪVRATAKALPAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 19*b* of the MS. described under No. 7758.

Complete.

Similar to the above.

Beginning:

अनघं वामनं सौरिं वैकुण्ठं पुरुषोत्तमम् ।
वासुदेवं हृषीकेशं माधवं मधुसूदनम् ॥
* * * *
श्रीवत्साङ्कं जगत्सेव्यं श्रीधरं श्रीपतिं हरिम् ।
ध्यायेदङ्कस्थितं कृष्णं देवक्यास्सुमनोहरम् ॥
श्रीकृष्णाय नमः ध्यानम् ।

End:

कौरवाणां विनाशाय दैत्यानां निधनाय च ।
गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे ॥

श्रीकृष्णाय नमः इदमर्घ्यम् ।
शङ्खवर्ण नमस्तुभ्यं नमस्ते धरणीधर ॥
नमस्ते रोहिणीपुत्र दत्तमर्घ्यं हलायुध ॥
बलभद्राय नमः इदमर्घ्यम् ॥

Colophon:

इति श्रीकृष्णजयन्तीकल्पस्समाप्तः ॥

No. **8272.** कृष्णजयन्तीव्रतकल्पः.

KṚṢṆAJAYANTĪVRATAKALPAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 17*a* of the MS. described under No. 8179, wherein it is given as Kṛṣṇajayantyaṣṭamīvratakalpa.

Complete; but wants a few leaves in the middle. From Skāṇḍapurāṇa.

Similar to the above.

Beginning:

एवंगुणेत्यादि मम--
श्रीकृष्णप्रतिमापूजां करिष्ये ।
पिबद्वामस्तनं ध्यायेत् स्पृशन्तं पाणिना परम् ॥
विलोक्य(क)मानं प्रेमार्थं(र्द्रं) मुखं मातुर्मुहुर्मुहुः ॥ (ध्यानम्) ।

End:

सनकाद्यैर्मुनिश्रेष्ठैः ऋषिसिद्धगणैस्तथा ।
कृतं धर्मविवृद्ध्यर्थं मुक्त्यर्थं मुनिपुङ्गवैः ॥

Colophon:

इति श्रीस्कन्दपुराणे जयन्त्यष्टमीव्रतकल्पं संपूर्णम् ॥

No **8273.** कृष्णजयन्तीव्रतकल्पः.

KṚṢṆAJAYANTĪVRATAKALPAḤ.

Pages, 10. Lines, 7 on a page.

Begins on fol. 31*a* of the MS. described under No. 7758.

Complete. From Pādmapurāṇā

Similar to the above.

Beginning:

एवङ्गुणविशेषणविशिष्टायां तिथौ मम समस्तपापक्षयार्थं . .

* * * *

श्रीकृष्णप्रीत्यर्थं पद्मपुराणोक्तकृष्णजयन्तीव्रतध्यानावाहनादिषोडशोपचार-पूजां करिष्ये । मण्टपे सर्वतोभद्रादिरङ्गवल्लीरचिते भूमौ . . . . . क्षौमवस्त्रोपरि वक्ष्यमाणदेवता आवाहयेत् । तदादौ देवकीस्थापनमन्त्रः —

देवीं स्वच्छाम्बरयुतां सर्वाभरणभूषिताम् ।
श्रीकृष्णवदनाम्भोजनिक्षिप्तकुचचूचुकाम् ॥
ततः सुतल्पशयनं गोविन्दं बालकं मुदा ।
लालयन्तीं प्रसन्नास्यां वन्देऽहं देवकीं पराम् ॥

End:

तत्फलं समवाप्नोति जयन्त्यां समुपोषणात् ॥
व्रतं कृतं ममाख्यातं श्रुत्वा साक्षतपाणिना ।
सर्वयज्ञायुतफलं प्राप्य पश्चाद्धरिं व्रजेत् ॥

Colophon:

इति श्रीपद्मपुराणे उमामहेश्वरसंवादे श्रीकृष्णजयन्तीव्रतविधानं सम्पूर्णम् ॥

No. 8274. कृष्णजयन्तीव्रतकल्पः.

KṚṢṆAJAYANTĪVRATAKALPAḤ.

Pages, 3. Lines, 12 on a page.

Begins on fol. 6*b* of the MS. described under No. 8198.

Complete.

Similar to the above.

Beginning:

चतुर्व्यूहसमायुक्तं सनकादिनिषेवितम् ।
जयन्तं मातुरुत्सङ्गे स्तनं संपीड्य पाणिना ॥

* * * *

एवंभूतं वासुदेवं ध्यायेच्चैकाग्रमानसम् ॥

ध्यानम् ।

आवाहये(ज्) जगन्नाथं सर्वलोकैकसुन्दरम् ।

सुप्रसन्नमुखाम्भोजं कोमलावयवोज्ज्वलम् ॥

आवाहनम् ।

End:

प्राजापत्यर्क्षयुक्तायामाविरासीत्स्वयं हरिः ।

गृहाणार्घ्यं मया दत्तं बलेन सह केशव ॥

इदमर्घ्यम् ।

अद्य स्थित्वा निराहारः श्वोभूते परमेश्वर ।

भोक्ष्यामि देवदेवेश अर्पयामि जनार्दन ॥

उपवाससमर्पणम् ।

No. **8275.** कृष्णजयन्तीव्रतकल्पः.

KṚṢṆAJAYANTĪVRATAKALPAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 10*a* of the MS. described under No. 8258.

Complete.

Similar to the above.

Beginning:

अतसीपुष्पसङ्काशं चतुर्बाहुविशोभितम् ।

देवक्या सहितं कृष्णं कलये गरुडध्वजम् ॥ ध्यानम् ।

आगच्छ जगदाधार कारुण्यामृतसागर ।

सत्याय सत्यपतये गोविन्दाय नमो नमः ॥ आवाहनम् ।

End:

परित्राणाय साधूनां . . . . . स्वयम् ।

गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे ॥

देवकीसहिताय श्रीकृष्णाय नमः—इदमर्घ्यम् ॥

No. **8276.** कृष्णजयन्तीव्रतार्घ्यश्लोकाः.
KṚṢṆAJAYANTĪVRATĀRGHYAŚLŌKĀḤ.

Page, 1. **Lines,** 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 5773

Complete.

On the offering of oblations of water in propitiation of Śrī Kṛṣṇa, on the anniversary day of his birth

Beginning and **End:**

कृष्णजयन्तीउपोष्या(न्त्युपवासा)ङ्गार्घ्यप्रदानङ्करिष्ये ।

जातः कंसवधार्थाय भूभारोत्तारणाय च ।
दानवानां विनाशाय दैत्यानां निधनाय च ॥
गृहाणार्घ्यं मया दत्तं रोहिण्या सहितो हरे ।
पाण्डवानां हितार्थाय धर्मसंस्थापनाय च ॥
कौरवाणां विनाशाय वसुदेवकुलोद्भव ।
गृहाणार्घ्यं मया दत्तं रोहिण्या सहितो हरे ॥

रोहिणीसहिताय कृष्णाय इदमर्घ्यम् ॥

No. **8277.** कृष्णजयन्तीव्रतार्घ्यश्लोकाः.
KṚṢṆAJAYANTĪVRATĀRGHYAŚLŌKĀḤ.

Page, 1. **Lines,** 4 on a page.

Begins on fol. 78*a* of the MS. described under No. 430, wherein this is called Jayantyarghyam.

Complete

Similar to the above.

Beginning:

जातः कंसवधार्थाय भूभारोत्तारणाय च ।
दानवानां विनाशाय दैत्यानां निधनाय च ॥

End:

क्षीरोदार्णवसम्भूत अत्रिनेत्रसमुद्भव ।
गृहाणार्घ्यं मया दत्तं रोहिणीसहितश्शशिन् ॥
रोहिणीसहितचन्द्रमसे नमः इदमर्घ्यं समर्पयामि ॥

No. **8278.** केदारव्रतकल्पः.

KĒDĀRAVRATAKALPAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 26*a* of the MS. described under No. 3105.

Complete.

On the Vrata which consists in the worship of Śiva on the 8th day of the bright fortnight in the month of Bhādrapada. The observance of this Vrata is considered to have the power of enabling one to obtain prosperity in life and salvation after death. A story illustrating the religious importance of the Vrata is also given.

Beginning:

शुद्धस्फटिकसंकाशं व्याघ्रचर्माजिनाम्बरम् ।
बिभ्राणं परशुं हस्ते मृगाभयवरं तथा ॥
प्रसन्नं पञ्चवदनं त्रिनेत्रं शशिशेखरम् ।
पद्मासनसुखासीनं पद्मासनकृतस्तवम् ॥
पार्वतीवदनाम्भोजविकासनवभास्करम् ।
स्कन्दनन्दिगणेशाद्यैः सेवितं पार्वतीसखम् ॥
एवंविधं महादेवं ध्यायेत् केदारनायकम् ॥ ध्यानम् ॥
सदाशिव नमस्तुभ्यं दयापर हर प्रभो ।
गृहाणेमां कृतां पूजामागच्छ शशिशेखर ॥ आवाहनम् ॥

* * * *

प्रदक्षिणनमस्कारः । मन्त्रहीनमिति चार्चनम् ॥

Colophon :

इति पूजाविधिः ।

कथाश्रवणम् । सूत उवाच—

यस्य प्रसादात्सञ्जातं भुवनं सचराचरम् ।
तं प्रणम्य महादेवं भगवन्तं सदाशिवम् ॥
केदारव्रतमाहात्म्यं सर्वकल्याणकारिणम् ।
प्रवक्ष्यामि जगद्भूतौ मुनिप्रवरसम्मतम् ॥

* * *

मासि भाद्रपदेऽष्टम्यां शुक्लपक्षे समाहितः ।
क्षौमैः कार्पासजैर्वापि पाद्मैर्वापि यथाशुचि ॥
हस्ते बद्ध्वा प्रतिसरमेकविंशतिसूत्रकैः ।
उपोष्य रजनीं ताञ्च कृत्वा ब्राह्मणभोजनम् ॥

End :

प्रार्थयेदिदमाकाङ्क्षी व्रतमेतत्समादिशेत् ।
महतीं सम्पदं प्राप्य शिवसायुज्यमाप्नुयात् ॥

Colophon :

इति श्रीस्कान्दपुराणे केदारव्रतकल्पकथा सम्पूर्णा ॥

No. 8279. केदारव्रतकल्पः.
KĒDĀRAVRATAKALPAḤ.

Pages, 13. Lines, 4 on a page.

Begins on fol. 27*a* of the MS. described under No. 8178.
Complete.
Similar to the above.

Beginning :

महिषां (ष्या) वृषभारूढं जटामकुटधारिणम् ।
चतुर्बाहुसमार(मुदारा)ङ्गं व्याख्यामुद्राक्षधारिणम् ॥

घुटिकापुस्तकंवारं(कधरं) सर्वाभरणभूषितम् ।
Same as the above.

No. 8462. लक्षवर्तिव्रतोद्यापनम्.
LAKṢAVARTIVRATŌDYĀPANAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 64*a* of the MS. described under No. 8177.

Complete. From Vāyupurāṇa.

On the manner of completing the Vrata described under No. 8454.

Beginning:

अथ लक्षवर्तिव्रतोद्यापनविधिरुच्यते—

मुने दशेयं नारीणां वैधव्यमतिदुःखदम् ।
कर्मणा जायते केन केन वाथ निवर्तते ॥
एतद्विस्तार्य मे विद्वन् कृपया वद सुव्रत ।
इति तस्या वचश्श्रुत्वा याजको वाक्यमब्रवीत् ॥
दैवे कर्मणि पित्र्ये च नार्यः पाकेषु संस्थिताः ।
अन्यस्मिन् रजसा दुष्टाः स्पृष्टभाण्डाद्युपस्कराः ।

* * * *

शान्तिं तत्र प्रवक्ष्यामि कर्मणोऽस्य बलक्षणे(ये) ।
निर्मूलं प्रव्रजत्याशु लक्षवर्तिव्रते कृते ॥

* * * *

कालो हि कार्त्तिको मासो वैशाखो माघ एव वा ।
सहस्रगुणितं धत्ते व्रतमेतत्तु कार्त्तिके ॥

End:

एतत्सर्वं मयाख्यातं पृच्छन्त्याः तव मा(चा)नघे ।
व्रतं कुरु सुखं तिष्ठ यथा ते रोचते मनः ॥

Colophon:

इति वायुपुराणे लक्षवर्तिव्रतकल्पस्सम्पूर्णः ॥

No. 8463. लक्षवर्तिव्रतोद्यापनम्.
LAKṢAVARTIVRATŌDYĀPANAM.

Pages, 10 Lines, 4 on a page.

Begins on fol. 18*a* of the MS. described under No. 8233.
Complete.
Similar to the above.

Beginning:

उद्यापनपूर्वदिवसे वर्तिदशाङ्गतर्पणार्थं ब्राह्मणानाहूय मया कृतलक्षवर्तिव्रतोद्यापनाङ्गत्वेन दशांशतर्पणानि कुर्यामि(ते)ति ब्राह्मणान् वृत्वा तर्पणं कारयेत् । कार्त्तिक्यां वा पौर्णमास्यां वैशाख्यां वा पौर्णमास्यां (माघ्यां)वा उद्यापनं कुर्यात् ।

End:

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
तस्मादस्याः प्रदानेन अदश्शान्तिं प्रयच्छ मे ॥

दशदानभूरिदानं च दद्यात् । अष्टोत्तरशतसंख्याकब्राह्मणान् भोजयित्वा स्वयं भोजयेत् ॥

Colophon :

इति वायुपुराणोक्तलक्षवर्तिव्रतोद्यापनविधिस्समाप्तः ॥

No. **8464.** लक्षवर्तिव्रतोद्यापनम्.

LAKṢAVARTIVRATODYĀPANAM.

Pages, 7. Lines, 5 on a page.

Begins on fol. 23*a* of the MS. described under No. 8232.

Complete.

Similar to the above.

Beginning :

अथोद्यापनविधि.—

उद्यापनदिनात्पूर्वदिवसे वर्त्या दशांशतर्पणार्थं ब्राह्मणानाहूय मदर्थं वर्त्या दशांशतर्पणं कुरुध्वमिति ब्राह्मणान् वृत्वा तर्पणं कारयेत् । कार्त्तिक्य(ं)पौर्णमास्यां माघ्यां वैशाख्यां वा उद्यापनं कुर्यात् ।

End :

मया कृतलक्षवर्तिव्रतसाद्गुण्यार्थं नामत्रयजपं करिष्ये इत्युक्त्वा नामत्रयं जपित्वा यथावित्तानुसारेण ब्राह्मणान् भोजयेत् ॥

Colophon :

इति श्रीवायुपुराणोक्तलक्षवर्तिव्रतोद्यापनविधिस्समाप्तः ॥

No. **8465.** लक्षवर्तिव्रतोद्यापनम्.

LAKṢAVARTIVRATODYĀPANAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 36*a* of the MS. described under No. 7758.

Complete.

Similar to the above.

Beginning :

उद्यापनदिनात् पूर्वं पूर्वदिवसे वर्त्या दशांशतर्पणार्थं ब्राह्मणानाहूय मदर्थं वर्त्या दशांशतर्पणं कुरुध्वमिति ब्राह्मणान् वृत्वा अग्ने नयेति मन्त्रेण तर्पणं कारयेत् । कार्त्तिकपौर्णमास्यां माघ्यां वैशाख्यां पौर्णमास्यां वा उद्यापनं कुर्यात् । पूर्वेद्युः तर्पणार्थं ब्राह्मणान् वृत्वा उद्यापन-

दिवसे प्रातस्स्नानादि नित्यकर्म कृत्वा आचार्यमुखेन स्वस्तिवाचनं पञ्चगव्यं च कारयित्वा पञ्चगव्यं प्राश्य उद्यापनार्थं सङ्कल्पं कुर्यात् ।

End:

यस्य स्मृत्येति ईश्वरार्पणं कृत्वा मया कृतलक्षवर्तिव्रतसाद्गुण्यार्थं मया कारिततर्पणहोमसाद्गुण्यार्थं नामत्रयमन्त्रजपं करिष्य इत्युक्त्वा नामत्रयं जपित्वा ब्राह्मणान् भोजयेत् ॥

Colophon:

इति वायुपुराणोक्तलक्षवर्त्युद्यापनविधिस्संपूर्णः ॥

No. 8466. लक्षस्वस्तिकव्रतकल्पः.

LAKṢASVASTIKAVRATAKALPAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 3*a* of the MS. described under No. 2917.

Complete. From Skandapurāṇa

This Vrata consists in worshipping Viṣṇu imagined as being present in the midst of a number of Svastika diagrams, of which one hundred thousand figures should be drawn within the period between the eleventh day of the bright fortnight in the month of Āṣāḍha and the corresponding day in the month of Kārtika.

Beginning:

शङ्करं जगतां नाथं भवं भुजगभूषणम् ।
दयासमुद्रं सद्भद्रं रुद्रं भद्रासने स्थितम् ॥
पप्रच्छ मधुरैर्वाक्यैः पत्युरानन्दकारिणी ।
भवत्प्रसादात्तुलसीमाहात्म्यं च श्रुतं मया ॥
धर्मार्थकाममोक्षाणां साधनं यद्भवेद्भुवि ॥

* * * *

यदा चोत्पद्यते वाञ्छा तदैतद्व्रतमाचरेत् ।
चातुर्मास्यां हरिप्रीत्यै कुर्यादेताद्विशेषतः ॥

पुण्ये सरसि नद्यां वा तटाके स्वगृहेऽपि वा ।
स्नात्वा धौतं समाच्छाद्य शुचिर्भूत्वा विमत्सरः ॥
वृन्दावने नदीतीरे गोष्ठे विष्णोश्च सन्निधौ ।
उपविश्या(लिप्या)रुणमृदा धातुना गोमयेन वा ॥
विनायकं नमस्कृत्य ध्यायन्ती मे(वै) सदा हरिः(म्) ।
एवंविधे दिने लक्षरङ्गवल्लीक्रियात्मकम् ॥
व्रतमेतत् करिष्येऽहं विष्णुप्रीत्यै सकाङ्क्षया ।

End:

लिखित्वा श्रावयित्वा च वाचयेत्तु दिनेदिने ।
अश्वमेधायुतफलं प्राप्नोतीह न संशयः ॥

Colophon:

इति स्कन्दपुराणे लक्षस्वास्तिकव्रतकल्पस्सम्पूर्णः ॥

No. **8467.** लक्ष्मीनारायणव्रतकल्पः.

LAKṢMĪNĀRĀYAṆAVRATAKALPAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 19*a* of the MS. described under No. 2641.

Complete. From Skandapurāṇa.

This Vrata consists in the worship of Viṣṇu on the eleventh day of the bright fortnight in the month of Bhādrapada when it happens to be a Monday or a Wednesday and is associated with the Śravaṇa asterism and the Vyatīpāta or the Gaṇḍa Yōga. This is considered to have the power of cleansing one of all sins.

Beginning:

सनत्कुमार उवाच—

कृत्वा तु पातकं घोरं नरो वाप्यथ वाङ्गना ।
मुच्यते कृत्तिकापुत्र तद्व्रतं ब्रूहि मे प्रभो ॥

* * * *

पापप्रणाशनं नाम लक्ष्मीनारायणव्रतम् ।
तद्व्रतं शृणु गाङ्गेय येन पापैः प्रमुच्यते ॥

कार्त्तिकेय उवाच—

शुक्लपक्षे नभस्ये तु वैष्णवर्क्षसमन्विता ।
सोमेन वाथ सौम्येन वारेणैकादशी तिथिः ॥
व्यतीपातेन गण्डेन योगषट्कसमन्विता ।
तस्यामाराधयेद्विष्णुं सर्वपापैः प्रमुच्यते ॥

End:

य इदं शृणुयाद्वापि पठेद्वा भक्तिमान् नरः ।
सर्वपापविमुक्तात्मा याति ब्रह्म सनातनम् ॥

Colophon:

इति स्कन्दपुराणे षण्मुखसनत्कुमारसंवादे लक्ष्मीनारायणव्रतकल्पः समाप्तः ॥

No. **8468.** लक्ष्मीनारायणव्रतकल्पः.

LAKṢMĪNĀRĀYAṆAVRATAKALPAḤ.

Pages, 42. Lines, 4 o n a page.

Begins on fol. 113*a* of the MS. described under No. 3055.

Complete.

Similar to the above

Beginning:

एवंगुणविशेषणविशिष्टायां शुभतिथौ मम इह जन्मनि जन्मान्तरेषु धर्मार्थकाममोक्षचतुर्विधपुरुषार्थफलसिद्ध्यर्थं . . . . . लक्ष्मीनारायणव्रतं करिष्ये। तदङ्गं पुण्याहवाचनं करिष्ये ।

* * * *

आचार्य(ाय गां स)वत्सदक्षिणां सालंकारा(रां) दत्वा ततः आशीर्वचनं कुर्यात् । शतं (त)पञ्चाशत्पञ्चविंशतिद्वादशब्राह्मणभोजनं दद्यात् ।

End:

यः करोति विधानेन लक्ष्मीनारायणव्रतम् ।
कृत्वा पापसहस्राणि यमलोकं न गच्छति ॥

यः पठेच्छृणुयाद्वापि भक्तियुक्तेन चेतसा ।
उपदेक्ष्यन्ति(ति) साधूनां सोऽपि विष्णोः पुरं व्रजेत् ॥

Colophon :

इति श्रीस्कान्दपुराणे श्रीलक्ष्मीनारायणव्रतकल्पस्सम्पूर्णः ॥

No. **8469.** लक्ष्मीनारायणव्रतकल्पः.

LAKṢMĪNĀRĀYAṆAVRATAKALPAḤ.

Pages, 2. Lines, 6 on a page

Begins on fol. 1*a* of the MS. described under No. 8168

Wants beginning and end.

Similar to the above.

Beginning :

. . . . . ब्रह्मचार्यादयोऽनघ ।
स्वधर्मचलनात्तात यान्ति ते नरकं परम् ॥

* * * *

पापप्रणाशनं नाम लक्ष्मीनारायणव्रतम् ।
विधिना केन देवर्षे येन पापात्प्रमुच्यते ॥

End :

त्रिपुरं हन्तुकामेन पूजितः शूलपाणिना ।
शक्रेण पूजितः पूर्वं तथा वृत्रवधे नृप ॥

No **8470.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 10. Lines, 7 on a page.

Begins on fol. 57*a* of the MS. described under No. 2411.

Complete. From Bhaviṣyōttarapurāṇa

This Vrata consists in the worship of Lakṣmī on the Friday which immediately precedes or comes off on the full-moon day in the month of Śrāvaṇa.

Beginning :

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गनाथेश्वरीं
दासीभूतसमस्तदेववनितां लोकैकदीपाङ्कुराम् ।
श्रीमन्मन्दकटाक्षलब्धविभवब्रह्मेन्द्रगङ्गाधरां
त्वां त्रैलोक्यकुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥

[ध्यानम् ।

गृहे वा स्वागतं देवि वरदे कमलालये ।
पद्मप्रिये पद्महस्ते क्षीरसागरकन्यके ॥ आवाहनम् ।

पद्मासने पद्मकरे सर्वलोकैकपूजिते ।
नारायणप्रिये देवि सुप्रीता भव सर्वदा ॥

Colophon

इति पूजाविधिः ॥

कैलासशिखरे रम्ये नानागणनिषेविते ।
मन्दारविटपिप्रान्ते नानामणिविराजिते ॥
रत्नपीठे सुखासीनं शङ्करं लोकशङ्करम् ।
पप्रच्छ गौरी सन्तुष्टा लोकानुग्रहकारणात् ॥

* * * *

शुक्ले श्रावणिके मासि पौर्णम्यां भार्गवे दिने ।
व्रतं समाचरेत्सम्यक् तेनेष्टं च भविष्यति ॥

End :

वरलक्ष्मीव्रतं नाम व्रतानामुत्तमं व्रतम् ।
तस्याः प्रसादात्सर्वेषां(वै च)भविष्यति न संशयः ॥

Colophon :

इति भविष्योत्तरपुराणे वरलक्ष्मीव्रतं सम्पूर्णम् ॥

No. **8471.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 9*a* of the MS. described under No. 2907.

Complete.

Same as the above.

No. **8472.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 69*a* of the MS. described under No. 8231.

Complete. From Skāndapurāṇa.

Same as the above.

Colophon:

इति श्रीस्कान्दपुराणे उमामहेश्वरसंवादे वरलक्ष्मीव्रतं सम्पूर्णम् ॥

No. **8473.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 110*a* of the MS. described under No. 7758.

Complete.

Same as the above.

No. **8474.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 8168, wherein in the list of other works it is given as two works, viz., Mahālakṣmīsaṅkalpa 13*b* and Varalakṣmīvrata 15*a*.

Complete. From Bhaviṣyōttarapurāṇa.

Same as the above.

No. 8475. वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 22. Lines, 4 on a page.

Begins on fol. 13*b* of the MS. described under No. 6152.

Complete. From Bhaviṣyōttarapurāṇa.

Same as the above. The Saṅkalpa (formal citation of date, place and purpose of any religious ceremony) relating to this Vrata is given at the beginning.

No. 8476. वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 6. Lines, 4 on a page.

Begins on fol. 19*a* of the MS. described under No 8178.

Complete. From Bhaviṣyōttarapurāṇa.

Same as the above.

No. 8477. वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 14. Lines, 6 on a page.

Begins on fol. 14*b* of the MS. described under No. 8239.

Complete. From Bhaviṣyōttarapurāṇa.

Same as the above.

No. 8478. वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 10. Lines, 4 on a page.

Begins on fol. 213*a* of the MS. described under No. 5661.

Complete. From Bhaviṣyōttarapurāṇa.

Same as the above.

No. **8479.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 48*a* of the MS. described under No. 2908.

Complete.

Same as the above.

No. **8480.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ

Pages, 11. Lines, 6 on a page.

Begins on fol. 15*a* of the MS. described under No. 8281.

Complete. From Bhaviṣyōttarapurāṇa.

Same as the above.

No. **8481.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 15. Lines, 5 on a page.

Begins on fol. 71*a* of the MS. described under No. 2908.

Complete. From Skāndapurāṇa.

Beginning:

एवङ्गुणविशेषण . . . तिथौ मम सन्तानसौभाग्यसिद्ध्यर्थं श्रीमहालक्ष्मीमुद्दिश्य श्रीमहालक्ष्मीप्रीत्यर्थं स्कान्दपुराणोक्तवरलक्ष्मीव्रतं करिष्ये ।

Remaining portion same as the above.

No. **8482.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 30*a* of the MS. described under No. 8233.

Complete.

Similar to the above.

Beginning :

एवंगुणविशेषणविशिष्टायां तिथौ अस्माकमित्यादिसर्वप्रतिबन्धनिवृत्त्यर्थं सर्वाभीष्टसिद्ध्यर्थं यथासंभवद्भिः द्रव्यैः यथासंभवनियमेन स्कन्दपुराणोक्तप्रकारेण वरलक्ष्मीव्रतं करिष्ये । इति संकल्प्य ।

ध्यानावाहनादिषोडशोपचारपूजां कुर्यात् ।

* * * *

Colophon :

इति श्रीस्कान्दपुराणे उमामहेश्वरसंवादे वरलक्ष्मीव्रतकल्पस्सम्पूर्णः ॥

No **8483.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMÎVRATAKALPAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 180*a* of the MS. described under No. 7758, wherein this has been omitted to be given in the list of other works.

Incomplete.

Similar to the above.

Beginning :

पूजयेत् कलशे देवीं पद्मं कृत्वा . . . ।
धर्मार्थकाममोक्षाणां सिद्धये कमलोद्भवाम् ॥
यासापद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गम्भीरावर्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैस्स्नापिता हेमकुम्भै-
र्नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥
पद्मासनां पद्मकरां पद्मकिञ्जल्कसन्निभाम् ।
. . . . महालक्ष्मीं विष्णुवक्षस्थलालये ॥
श्रीमहालक्ष्म्यै नमः ध्यानम् ।

End:

भुवनेश्वर्यै, अश्विन्यै, मर्दिन्यै, यक्षिण्यै, दामजप्यायै, क्षेत्रहारिण्यै, विश्वसुखदुःखनिलयायै ॥

No. **8484.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 31*a* of the MS. described under No. 8179.

Complete. From Bhaviṣyōttarapurāṇa.

Similar to the above.

Beginning:

पद्मासनां पद्महस्तां पद्मां पद्मनिभेक्षणाम् ।
दिग्गजैस्स्नाप्यमानां च काञ्चनैः कलशोत्तमैः ॥ ध्यानम् ॥
आवाहयामि देवि त्वामाहूतां देवदानवैः ।
आगच्छ भक्तवरदे नित्यं सन्निहिता भव ॥ आवाहनम् ॥

* * * *

Colophon:

इति श्रीभविष्योत्तरपुराणे उमामहेश्वरसंवादे वरलक्ष्मव्रितकल्पस्सम्पूर्णः ॥

No. **8485.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Substance, palm-leaf. Size, $8\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 38. Lines, 4 on a page. Character, Kanarese. Condition, good. Appearance, old.

Complete.

Similar to the above.

Beginning:

प्राणानायम्य, संकल्प्य, सर्वाभीष्टसिद्ध्यर्थं सत्सन्तानाभिवृद्ध्यर्थं शतवार्षिकसुवासिनीफलसिद्ध्यर्थं सकलैश्वर्यप्राप्त्यर्थं भविष्योत्तरपुराणेनवरलक्ष्मी-

व्रतकल्पोक्तसकलफलावाप्त्यर्थं श्रीमहालक्ष्मीमुद्दिश्य वरलक्ष्मीप्रीत्यर्थं यावच्छक्यं ध्यानावाहनादिषोडशोपचारपूजां करिष्ये ।

For the remaining portion, see the previous number.

Colophon:

इति भविष्योत्तरपुराणे वरलक्ष्मीव्रतकल्पस्सम्पूर्णः ॥

No. **8486.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 8 Lines, 6 on a page.

Begins on fol. 59*a* of the MS. described under No. 8177.
Complete.
Similar to the above.

Beginning:

एवंगुणविशेषणविशिष्टायां शुभातिथौ मम सन्तानसौभाग्यसिद्ध्यर्थं भविष्योत्तरपुराणोक्तवरलक्ष्मीव्रतं करिष्ये—

चतुर्भुजां महालक्ष्मीं वरदाभयशोभिनीम् ।
रक्ताम्बुजधरां देवीं कमलोपरिसंस्थिताम् ॥ ध्यानम् ।

* * * *

Colophon:

इति भविष्योत्तरपुराणे वरलक्ष्मीव्रतपूजाविधानं समाप्तम् ॥

No. **8487.** वरलक्ष्मीव्रतकल्पः.

VĀRALAKṢMĪVRATAKALPAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 92*a* of the MS. described under No. 3055
Wants beginning.
Similar to the above.

Beginning:

पद्मासने पद्मकरे सर्वलोकैकपूजिते ।
नारायणप्रिये देवि सुप्रीता वरदा भव ॥
मन्त्रेणानेन सकलानुपचारान् यथाक्रमात् ।
कृत्वा तु दक्षिणे हस्ते नवसूत्रं दधुस्त्रयः ॥

End:

य इदं शृणुयान्नित्यं सर्वपापैः प्रमुच्यते ।
तत् प्रसादेन सर्वासां भविष्यति न संशयः ॥

Colophon:

इति भविष्योत्तरपुराणे वरलक्ष्मीव्रतकथा सम्पूर्णा ॥

No 8488. वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Substance, palm-leaf. Size, 15⅜ × 1⅛ inches. Pages, 18. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 61*a*. The other works herein are Sannyāsi-saṁskāra 1*a*, Dattahōmaprayōga 10*a*, Dattamīmāṁsā 13*a*, Āturasannyāsavidhi 57*a*, Jyautiṣaviṣaya 76*a*, Antyēṣṭiprayōga 80*a*.

Complete.

Similar to the above.

Beginning:

एवंगुणविशेषणविशिष्टायां शुभतिथौ मम सकलसंपत्समृद्ध्यर्थं मम गृहे श्रीमहालक्ष्म्यास्स्थैर्यसिद्ध्यर्थं श्रीवरलक्ष्मीमुद्दिश्य श्रीवरलक्ष्मीप्रीत्यर्थं यावज्जीवं पुत्रपौत्रसमर्तृका(ता)सिद्ध्यर्थं प्रतिवर्षश्रावणमासपूर्णिमायुक्तभृगुवासरसंयुक्तां श्रीवरलक्ष्मीव्रताङ्गश्रीवरलक्ष्मीपूजां करिष्ये ।

* * * *

मम वरलक्ष्मीदेवता सुप्रीता वरदा भूत्वा मम वरलक्ष्मीव्रतं संपूर्णमस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु ।

कथा—

कैलासशिखरे रम्ये नानागणनिषेविते ।
मन्दारविटपिप्रान्ते नानामणिविभूषिते ।
रत्नपीठे सुखासीनं शङ्करं लोकशङ्करम् ।
पप्रच्छ गौरी सन्तुष्टा लोकानुग्रहकाम्यया ॥

End:

य इदं शृणुयान्नित्यं पठित्वा तु समाहितः ।
सर्वसंपत्तिसंयुक्तः कुबेरसदृशो भवेत् ॥

Colophon:

इति उमामहेश्वरपार्वतीसंवादे श्रीवरलक्ष्मीव्रतं सम्पूर्णम् ॥

No. **8489.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 22. Lines, 6 on a page.

Begins on fol. 50*a* of the MS. described under No. 8171.

Complete From Skāndapurāṇa.

Similar to the above.

Beginning:

एवंगुणविशेषणविशिष्टायामस्यां पुण्यतिथौ वरलक्ष्मीप्रसादद्वारा मम सर्वाभीष्टसिद्ध्यर्थं वरलक्ष्मीव्रतं करिष्ये ।

End:

पद्मासने . . . . . सर्वदा ॥

Colophon:

इति श्रीस्कान्दपुराणे उमामहेश्वरसंवादे वरलक्ष्मीव्रतं समाप्तम् ॥

No. **8490.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 16*a* of the MS. described under No. 8197.

Complete.

Similar to the above. From Bhaviṣyōttarapurāṇa.

It is stated that this MS. was written by Yellayagāri of Dēvarakoṇḍa on Wednesday the eighth day of the dark fortnight in the month of Nija Śrāvaṇa in the year Īśvara.

Beginning :

शङ्खचक्रमहाहस्ते शुभ्रवर्णे सुधा(खा)सने ।
महादेवि वरं देहि सर्वसिद्धिप्रदायिनि ।

* * * *

नमस्ते देवदेवेशि नमस्ते विष्णुवल्लभे ।
नमस्ते पूर्णचन्द्राभे नमस्ते भक्तवत्सले ॥ पुष्पम् ।

अथ कथाप्रसङ्गः—

कैलाससिखरे रम्ये नानागणनिषेविते ।
मन्दारविटपिप्रान्ते नानामणिविभूषिते ॥

* * * *

शुक्ले (तु) श्रावणे मासे पौर्णमास्यां तु भार्गवे ।

* * * *

वरलक्ष्मीव्रतं पुण्यं वक्ष्यामि शृणु पार्वति ।

End:

कथितं ते महादेवि वरलक्ष्मीव्रतं शुभम् ।
सर्वसम्पत्करं पुण्यं पुत्रपौत्रप्रवर्धनम् ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे वरलक्ष्मीव्रतकल्पस्सम्पूर्णः ॥

No. 8491. वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 15*a* of the MS. described under No. 5765.

Complete.

Similar to the above.

Beginning:

एवंगुणविशेषणविशिष्टायां शुभतिथौ वरलक्ष्मीदेवतामुद्दिश्य वरलक्ष्मीदेवताप्रीत्यर्थं ध्यानावाहनादिषोडशोपचारपूजां करिष्ये, तदङ्गं कलशाराधनं करिष्ये । कलशपूजां कुर्यात् ।

* * * *

मन्त्रहीनं क्रियाहीनं भक्तिहीनं च इन्दिरे ।
यत् पूजितं मया देवि सुप्रीता वरदा भव ॥

इति प्रार्थनामन्त्रः ॥

Colophon:

इति पूजाविधानं संपूर्णम् ॥

End:

कैलासशिखरे रम्ये नानागणनिषेविते ।
मन्दारविटपिप्रान्ते सौधनानामणिप्रभे ॥

* * * *

य इदं शृणुयान्नित्यं सर्वपापैः प्रमुच्यते ।
. . . . . न संशयः ॥

Colophon:

इति भविष्योत्तरपुराणे वरलक्ष्मीव्रतं संपूर्णम् ॥

No. **8492.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 7. Lines, 8 on a page.

Begins on fol. 106*a* of the MS. described under No. 8167.
Almost complete.
Similar to the above. From Bhaviṣyōttarapurāṇa.

Beginning:

अहं रुद्रेभिरिति लक्ष्मीसूक्तेन कलशस्थापनं करिष्ये ।

* * * *

शुभे शोभने मुहूर्ते शुभयोगशुभकरण एवङ्गुणविशेषणविशिष्टायां शुभतिथौ शोभनदेवतान्तर्यामिश्रीलक्ष्मीनारायणप्रीत्यर्थं वरलक्ष्मीप्रीत्यर्थं . . . वरलक्ष्मीपूजाङ्करिष्ये ।

शुक्लाम्बरधरं विष्णुं . . . सर्वविघ्नोपशान्तये ॥
पद्मासने पद्मकरे सर्वलोकैकपूजिते ।
नारायणप्रिये देवि सुप्रीता भव सर्वदा ॥

End:

य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
वरलक्ष्मीप्रसादेन लभते वाञ्छितं फलम् ॥

Colophon:

इति श्रीभविष्योत्तर . . . ॥

No. **8493.** वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Pages, 24. Lines, 6 on a page.

Begins on fol. 14*a* of the MS. described under No. 8166.
Complete From Brahmāṇḍapurāṇa.
Similar to the above.

Beginning:

आचम्य प्राणानायम्य सङ्कल्प्य एवङ्गुणविशेषणविशिष्टायां शुभतिथौ . . . . महावरलक्ष्मीमुद्दिश्य महावरलक्ष्मीप्रीत्यर्थं महावरलक्ष्मीपूजां करिष्ये ।

* * *

Colophon:

इति ब्रह्माण्डपुराणे उमामहेश्वरसंवादे वरलक्ष्मीकथा पञ्चमोऽध्यायः ॥

No. 8494. वामनजयन्तीव्रतकल्पः.

VĀMANAJAYANTĪVRATAKALPAḤ.

Pages, 27. Lines, 5 on a page.

Begins on fol. 22*a* of the MS. described under No. 2908.

Complete. From Bhavisyōttarapurāṇa.

This Vrata consists in worshipping Vāmana, an incarnation of Viṣṇu, in the Vṛścika Lagna on the twelfth day of the bright fortnight in the month of Bhādrapada when the day happens to be a Sunday and is associated with the asterism Śravaṇa. This is considered to have the power of making one prosperous in life and enabling one to realise one's object Two different versions of this Vrata are given in this MS.

Beginning:

चन्द्रमण्डलमध्यस्थं शुद्धस्फटिकसन्निभम् ।
दध्योदनं वामहस्ते दक्षिणे कलशामृतम् ॥
शुक्लमाल्याम्बरधरं सर्वाभरणभूषितम् ।

* * * *

वामनं च प्रभुं ध्यायेद्दुर्गमोत्तारणाय च ॥
परमात्मने नमः—ध्यानम् ।

* * * *

इमां पुण्यकथां श्रुत्वा भक्तियुक्तेन चेतसा ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं व्रजेद्ध्रुवम् ॥

Colophon:

इति भविष्योत्तरपुराणे वामनजयन्तीव्रतकल्पः सम्पूर्णः ॥

इदमन्यत् प्रवक्ष्यामि सर्वपापप्रणाशनम् ।
पुत्रदं भाग्यदं नृणां सर्वाभीष्टप्रदायकम् ॥
मासे भाद्रपदे शुद्धद्वादश्यां रविवासरे ।
श्रवणे नाम्नि नक्षत्रे मध्याह्ने वृश्चिके शुभे ॥

End:

पूर्वोक्तविधिना प्रातः भोजनं पृषदाज्यकम् ।
सर्वं दत्वार्चयन्मर्त्यः शाश्वतीं गतिमाप्नुयात् ॥

Colophon:

इति भविष्योत्तरपुराणे वामनजयन्तीव्रतकल्पस्सम्पूर्णः ॥

No. **8495.** वामनजयन्तीव्रतकल्पः.

VĀMANAJAYANTĪVRATAKALPAḤ.

Pages, 21. Lines, 5 on a page.

Begins on fol. 43*b* of the MS. described under No. 8239.

Incomplete.

Same as the above.

Beginning:

उपवाससमर्थानां स देवः पुरुषोत्तमः ।
याचेऽहं द्वादशीपुण्यं वद त्वं सविधानतः ॥

श्रीकृष्ण उवाच—

मासे भाद्रपदे शुक्ले द्वादशी श्रवणान्विता ।
सर्वपापहरं पुण्यमुपोष्यं तन्महाफलम् ॥
सलिले सरसि स्नात्वा द्वादशीनामुपोषितम् ।
अयनात्स्वर्गमाप्नोति नात्र कार्या विचारणा ॥
जलपूर्णं ततः कुम्भं स्थापयित्वा विधानतः ।
पञ्चरत्नसमोपेतं सोपवीतं सुपूजितम् ॥

* * * *

ओन्नमो भगवते वासुदेवायेति पूजयेत्क्रमतः सुधीः ॥

See under the previous number for the remaining portion.

No. **8496.** वामनजयन्तीव्रतकल्पः.

VĀMANAJAYANTĪVRATAKALPAḤ.

Pages, 3. Lines, 11 on a page.

Begins on fol. 10*a* of the MS. described under No. 8198.

Complete.

Similar to the above.

Beginning:

युधिष्ठिर उवाच—

उपवाससमर्थानां सदैव पुरुषोत्तम[:] ।
या च वै द्वादशी पुंसां तद्वदस्व विधानतः ॥
मासि भाद्रपदे शुद्धा द्वादशी श्रवणान्विता ।
सर्वपापहरा पुण्या तस्यामुपवसेदिति ॥

End:

देवदेव जगन्नाथ सृष्टिसंहारकारक ।
शरणन्त्वां प्रपन्नोऽस्मि पाहि मां भक्तवत्सल ।
निर्विण्णोऽस्मि महाघोरसंसाराख्ये महार्णवे ।
मामुद्धर हृषीकेश वामनाय नमोऽस्तु ते ॥ इति प्रार्थना ॥

No. **8497.** वामनजयन्तीव्रतकल्पः.

VĀMANAJAYANTĪVRATAKALPAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 66*a* of the MS. described under No. 8233

Complete.

Similar to the above

Beginning:

अतसीपुष्पसंकाशं चतुर्बाहुं शुभेक्षणम् ।
चन्द्रमण्डलमध्यस्थं शुद्धस्फटिकसन्निभम् ॥
दध्योदनं वामहस्ते दक्षिणे कलशामृतम् ।
शुक्लमाल्याम्बरधरं सर्वाभरणभूषितम् ॥
श्रीवामनं महाविष्णुं ध्यायेत्सिद्धिप्रदायकम् । ध्यानम् ॥

End:

चन्द्रमण्डलमध्यस्थं(स्थ)चन्द्राम्बुदसमप्रभ[म्] ।
दध्यन्नं प्रीयतां देव वामनाय नमो नमः ॥

Colophon :

इति वामनपूजाविधिः ॥

No. **8498.** वामनजयन्तीव्रतपूजा.

VĀMANAJAYANTĪVRATAPŪJĀ

Pages, 2. Lines, 6 on a page.

Begins on fol. 13*a* of the MS. described under No. 8258

Contains the portion relating to Pūjā only of the Vrata described under the previous number.

Beginning :

शान्तं पद्मासनस्थं शशधरमकुटं श्रीपतिं कौस्तुभाङ्गं
हस्ते पीयूषसर्पिर्दधियुतचषकं भक्तयुक्तं दधानम् ।
श्वेतं वस्त्रं दधानं कटकमकुटकं हारकेयूरभारं
नानालङ्कारयुक्तं स्फटिकमणिनिभं वामनं नौमि देवम् ॥

श्रीवामनाय नमः—ध्यानम् ।

End :

प्राजापत्यमिदं चान्नं दधिक्षीरघृतैर्युतम् ।
नानाभक्ष्यफलोपेतं नैवेद्यं सङ्गृहाण मे ॥ नैवेद्यम् ।
पूगीफलसमायुक्तम्. . . . . ताम्बूलम् ॥

No. **8499.** विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 10*a* of the MS. described under No. 8197.

Complete. From Skandapurāṇa.

This Vrata consists in the worship of Vighnēśvara on the fourth day of the bright fortnight in the month of Bhādrapada. This is considered to have the power of enabling one to accomplish one's objects without obstacles.

Beginning:

एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।
पाशाङ्कुशधरं ध्यायेत्सर्वविघ्नोपशान्तये ॥
ध्यायेद्गजाननं देवं तप्तकाञ्चनसन्निभम् ।
चतुर्भुजं महाकायं सर्वाभरणभूषितम् ॥
दन्ताक्षमालापरशुं पूर्णमोदकपात्रिणम् ।
मोदकंसप्त(कासक्त)तुण्डाग्रमेकदन्तं विनायकम् ॥
दन्तमध्ये करं चैव द्वितीये साक्षसूत्रकम् ।
तृतीये परशुं चैव चतुर्थे मोदकं न्यसेत् ॥ ध्यानम् ।

* * * *

Colophon:

इति विनायकव्रतकल्पपूजाविधानं संपूर्णम् ॥

अथ कथा —

अरण्ये वर्तमानास्ते पाण्डवा दुःखद(क)र्शिताः ।
व्यासशिष्यं महात्मानं सूतमूचुः कुतूहलात् ॥
निर्विघ्नेन तु कार्याणि कथं सिध्यन्ति सूतज ।

* * * *

मासे भाद्रपदे शुक्ले चतुर्थ्यां पूजयेन्नरः ।
यदा वोत्पद्यते भक्तिः तदा पूज्यो गणाधिपः ॥
प्रातश्शुक्लैस्तिलैस्स्नात्वा मध्याह्ने देवमर्चयेत् ।

End:

य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सिध्यन्ति सर्वकार्याणि सिद्धिस्व(द)स्य प्रसादतः ॥

Colophon:

इति श्रीस्कन्दपुराणे सिद्धिविनायकव्रतकल्पं सम्पूर्णम् ॥

No. 8500. विनायकव्रतकल्पः.
VINĀYAKAVRATAKALPAḤ.

Pages, 14. Lines, 4 on a page.

Begins on fol. 180*b* of the MS. described under No. 1116, wherein this was omitted to be given in the list of other works.

Complete. From Skāndapurāṇa.

Same as the above.

No. 8501. विनायकव्रतकल्पः.
VINĀYAKAVRATAKALPAḤ.

Pages, 23. Lines, 4 on a page.

Begins on fol 1*a* of the MS. described under No. 6152, wherein it is entered as Gaṇēśapūjāvidhāna.

Complete.

Same as the above.

इति श्रीस्कान्दपुराणे कृष्णयुधिष्ठिरसंवादे विनायकव्रतकल्पं सम्पूर्णम् ॥

No. 8502. विनायकव्रतकल्पः.
VINĀYAKAVRATAKALPAḤ.

Pages, 13. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 8177.

Complete.

Same as the above.

No. 8503. विनायकव्रतकल्पः.
VINĀYAKAVRATAKALPAḤ.

Pages, 14. Lines, 4 on a page.

Begins on fol. 11*a* of the MS. described under No. 8168.

Wants beginning and end in Pūjāvidhāna and wants beginning in the Kathā.

Same as the above.

No. 8504. विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 8195.

Complete.

Same as the above.

No. 8505. विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 29*a* of the MS. described under No. 8179, wherein it is given as Siddhivināyakavrata.

Incomplete. Contains Pūjā only.

Same as the above.

No 8506. विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 25. Lines, 7 on a page

Begins on fol. 118*a* of the MS. described under No. 8171.

Complete. This is taken from the Skāndapurāṇa

Similar to the above.

Beginning:

गजवदनमचिन्त्यं तीक्ष्णदन्तं त्रिणेत्रं
बृहदुदरमशेषं पूतरूपं पुराणम् ।
अमरवरसुपूज्यं रक्तवर्णं सुकेशं
पशुपतिसुतमीशं विघ्नराजं नमामि ॥
ध्यायेद्गजाननं देवं तप्तकाञ्चनसन्निभम् ।
चतुर्भुजं महाकायं सर्वाभरणभूषितम् ॥
एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिविनायकम् ॥ ध्यानम् ।

See No. 8499 for the remaining portion.

Colophon :

इति श्रीस्कान्दे पुराणे सिद्धिविनायककल्पस्सम्पूर्णः ।

No. **8507.** विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 10. Lines, 7 on a page.

Begins on fol. 8*a* of the MS. described under No 8177 wherein it is given as Siddhivināyakavrata.

Incomplete.

The first leaf contains Vināyakapūjāvidhāna in Kanarese character.

Beginning :

आसनप्राणायामं कृत्वा पूर्वोक्तैवंगुणविशेषणविशिष्टायां शुभतिथौ सर्वकाम्यार्थसिद्ध्यर्थं पुत्रपौत्राभिवृद्ध्यर्थं सिद्धिविनायकमुद्दिश्य सिद्धिविनायकप्रीत्यर्थं स्कन्दपुराणोक्तविनायकव्रतं करिष्ये ॥

The remaining portion here is the same as in the MS. described under the last number.

Colophon :

इति स्कान्दपुराणे सिद्धिविनायकव्रतकल्पः सम्पूर्णः ॥

No. **8508.** विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 19*a* of the MS. described under No. 5765.

Complete. From Skāndapurāṇa.

Similar to the above.

Beginning :

एवंगुणविशेषणविशिष्टायां शुभतिथौ महागणपतिमुद्दिश्य महागणपतिप्रीत्यर्थं ध्यानावाहनादिषोडशोपचारपूजां करिष्ये। कलशपूजां कुर्यात् ॥

एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिविनायकम् ॥ ध्यानम् ।

See under the previous number for the remaining portion.

No 8509. विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAH.

Pages, 10. Lines, 6 on a page.

Begins on fol. 18*a* of the MS. described under No. 8168.
Complete.
Similar to the above.

Beginning:

प्राणानायम्य सङ्कल्पं कुर्यात् ।
ध्यायेद्गजाननं देवं तप्तकाञ्चनसन्निभम् ।
चतुर्भुजं महाकायं सूर्यकोटिसमप्रभम् ॥

* * * *

मोदकासक्ततुण्डाग्रं भिन्नदन्तं विनायकम् ।

आधारशक्तयै नमः । कूर्माय नमः । अनन्ताय नमः । पृथिव्यै नमः । इक्षुधराय नमः ।

End:

देवदेव जगन्नाथ सुरासुरवरार्चित ।
अविघ्नं कुरु मे सर्वं पूजितोऽसि मया प्रभो ॥ प्रार्थना ॥

इति पूजाविधानं संपूर्णम् ॥

अथ कथाप्रारम्भः—

ऋषयो विघ्नबाहुल्यं विचार्यादौ स्वकर्मसु ।
सङ्गता नैमिशारण्ये सर्वे सूतमथाब्रुवन् ॥

ऋषय ऊचुः—

निर्विघ्नेन तु कार्याणि कथं सिध्यन्ति सूतज ॥

* * * *

तस्य सर्वेषु कार्येषु क(स)दा विघ्नो न जायते ॥
सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ।

Colophon :

इति स्कन्दपुराणे वरसिद्धिविनायकव्रतकल्पस्सम्पूर्णः ॥

No. **8510.** विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 17. Lines, 6 on a page.

Begins on fol. 57*a* of the MS. described under No. 8233.

Complete. From Skāndapurāṇa.

See under the previous number for the beginning.

End :

वैष्णवाद्यासु दीक्षासु आदौ पूज्यो गणाधिपः ॥
तस्मिन् संपूजितो विष्णुरीशो भानुस्तथा उमा ।
हव्यवाहमुखा देवाः पूजितास्स्युर्न संशयः ॥
चण्डिकाद्या मातृगणाः परितुष्टा भवन्ति च ।
सिध्यन्ति सर्वकार्याणि सिद्धिदस्य प्रसादतः ॥
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सर्वपापविनिर्मुक्तो रुद्रलोकं स गच्छति ॥

Colophon :

इति स्कन्दपुराणे सिद्धिविनायकव्रतकल्पस्संपूर्णः ॥

No. **8511.** विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 13. Lines, 5 on a page.

Begins on fol. 14*a* of the MS. described under No. 2907.

Complete. From Bhaviṣyōttarapurāṇa.

Same as the above.

Colophon :

इति भविष्योत्तरपुराणे सिद्धिविनायकव्रतकल्पं सम्पूर्णम् ॥

No. 8512. विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 9. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 8180.
Complete. From Bhavisyōttarapurāṇa.
Similar to the above.

Beginning:

आदौ संकल्प्य प्राणप्रतिष्ठां कुर्यात् ।

उत्तमं गणनाथस्य व्रतं संपत्करं शुभम् ।
भक्तवाञ्छितदातारं सर्वमङ्गलकारणम् ॥
एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिविनायकम् ॥ ध्यानम् ।
अत्रागच्छ जगद्वन्द्य सुरराजार्चितेश्वर ।
अनाथनाथ सर्वज्ञ लोकेश गणनायक ॥
विनायक नमस्तेऽस्तु गौरीमलसमुद्भव ।
इमां मया कृतां पूजां गृहाण सुरसत्तम ॥ आवाहनम् ।

End:

कथा—

निर्विघ्नेन तु कार्याणि कथं सिध्यन्ति सूतज ।
अथ सिद्धिः कथं नृणां पुत्रसौभाग्यसम्पदः ॥

* * * *

ये च शृण्वन्ति सततं पठ्यमानं द्विजोत्तमैः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

Colophon:

इति भविष्योत्तरपुराणे विनायककल्पः सम्पूर्णः ॥

No. **8513.** विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 38*a* of the MS. described under No. 8197.

Incomplete.

Same as the above.

No. **8514.** विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 27. Lines, 7 on a page.

Begins on fol. 76*a* of the MS. described under No. 8177.

Complete. From Skāndapurāṇa.

Same as the above.

No. **8515.** विनायकव्रतकल्पः.

VINĀYAKAVṚATAKALPAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 21*a* of the MS. described under No. 8179.

Complete. From Bhaviṣyōttarapurāṇa.

Same as the above.

Colophon:

इति श्रीभविष्योत्तरपुराणे श्रीसिद्धिविनायकव्रतकल्पस्सम्पूर्णः

No. **8516.** विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 16. Lines, 4 on a page.

Begins on fol. 55*a* of the MS. described under No. 2908.

Complete. From Bhaviṣyōttarapurāṇa.

Same as the above.

No. **8517.** विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 87*a* of the MS. described under No. 2908

Complete. From Bhaviṣyōttarapurāṇa.

Same as the above.

The MS. is said to have been transcribed by one Ahōbila Nārāyaṇasvāmi.

No. 8518. विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 19. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 8239.

Complete. From Bhaviṣyōttarapurāṇa.

Same as the above.

Colophon:

इति श्रीभविष्योत्तरपुराणे वरसिद्धिविनायकव्रतकल्पः सम्पूर्णः ॥

No. 8519. विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 53*a* of the MS. described under No. 8166.

Incomplete.

Similar to the above.

Beginning:

शुक्ला . . . . . शान्तये ॥

शुभे शुभतिथौ परमेश्वरप्रीत्यर्थमस्माकं सहकुटुम्बानामिष्टकाम्यार्थसिद्ध्यर्थं . . . . सिद्धिविनायकपूजां करिष्ये । तदङ्गं कलशपूजां करिष्ये ।

ध्यायेद्गजाननं देवं स(त)प्तकाञ्चनसन्निभम् ।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिविनायकम् ॥ ध्यायामि ।

The remaining portion is the same as in the MS. described under the last number.

No 8520. विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 11. Lines, 5 on a page.

Begins on fol. 139*a* of the MS. described under No. 5661.

Incomplete.

Beginning:

उत्तमं गणनाथस्य पुजनं सर्वसिद्धिदम् ।
भक्तानां वाञ्छितं प्रीत्यै करोति तव पूजनम् ॥
ध्यायेद्गजाननं देवं तप्तकाञ्चनसन्निभम् ।
चतुर्भुजं महाकायं सर्वाभरणभूषितम् ॥ ध्यानम् ।

The remaining portion is the same as in the above

No. 8521. विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 4. Lines, 11 on a page.

Begins on fol. 8*b* of the MS. described under No. 8198.

The beginning is the same as in the above.

End:

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्याणि सर्वदा ॥

इति प्रार्थना ॥

Colophon:

इति विनायकपूजाविधिः समाप्तः ॥

No. 8522. विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 7. Lines, 9 on a page.

Begins on fol. 18*a* of the MS. described under No. 2467, wherein it is given as Gaṇēśapūjāvidhāna.

Complete.

Similar to the above.

Beginning :

शुक्लाम्बरधरं . . . . . शान्तये ॥

ओं भूः . . . . . वरोम् ।

शुभे शोभने . त्यर्थे महागणपतिप्रीत्यर्थे शुद्धचतुर्थीपुण्यकाले कल्पोक्तप्रकारेण यावच्छक्त्यध्यानावाहनाद्युपचारेण वल्लभाम्बासमेतश्री-महागणपतिपूजां करिष्ये । तदङ्गकलशपूजां पीठपूजां च करिष्ये । . . . . . सर्वशक्तिकमलासनाय नमः—इति प्रार्थ्य विघ्नेश्वरं ध्यात्वा

उत्तमं गणनाथस्य व्रतं सम्पत्करं शुभम् ।
भक्तवाञ्छितदातारं सर्वमङ्गलकारकम् ॥
कोटिसूर्यप्रभं देवं गजवक्त्रं चतुर्भुजम् ।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिविनायकम् ॥ इति सञ्चिन्त्य ।

End :

हृत्पद्मकर्णिकामध्ये देव्या वल्लभया सह ।
प्रविश श्रीगणाधीश सर्वैरावरणैस्सह ॥
इत्युक्त्वा वल्लभाम्बासमेतश्रीगणेशं हृद्युद्वासयेत् ।
कवचमूलमन्त्राणि जपेत् ॥

No. 8523. विनायकव्रतकल्पः.

VINĀYAKAVRATAKALPAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 2*a* of the MS. described under No 8258.
Complete.
Similar to the above.

Beginning :

ध्यायेद्गजाननं देवं तप्तकाञ्चनसन्निभम् ।
चतुर्भुजं महाकायं सर्वाभरणभूषितम् ॥

एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिविनायकम् ॥ ध्यानम् ।
विघ्नराज नमस्तेऽस्तु गौरीमलसमुद्भव ।
इमां मया कृतां पूजां गृह्णीष्व सुरसत्तम ॥ आवाहनम् ।

End:

भास्वद्रत्नप्रभाभिश्च जयकर्पूरचन्दनैः ।
नीराजयामि विश्वेश भक्ताभीष्टपरो (प्रदो) भव ॥ नीराजनम् ।
गणानां त्वा गणपतिं हवामह इति मन्त्रपुष्पम् ।
आखुवाहन देवेश विश्वरूपधराय च ।
प्रदक्षिणं करोमि त्वां मम त्वं सन्तितो(न्निधौ)भव ॥ प्रदक्षिणम् ।

No. **8524.** विष्णुपञ्चकव्रतम्.
VIṢṆUPAÑCAKAVRATAM.

Pages, 10. Lines, 4 on a page.

Begins on fol. 23*a* of the MS. described under No. 8233.

Complete. From Bhaviṣyōttarapurāṇa.

Wants beginning.

This Vrata consists in the worship of Viṣṇu for five days commencing from the eleventh day of the bright fortnight in the month of Mārgaśira or better in the month in which the asterism Śravaṇa is associated with the full moon or the twelfth day of the bright fortnight. This is to be observed on the corresponding five days of every bright fortnight, for a period of one year. Those that observe this are considered to be able to obtain salvation.

Beginning:

सर्वेषामाश्रमाणां च पुराणश्रुतिचोदितम् ।
द्वापरान्ते महाराजः कुन्तीपुत्रो युधिष्ठिरः ॥
भ्रातृभिस्सह धर्मात्मा द्रोणं भीमं तथा गुरून् ।
पुत्रान् पौत्रान् तथा भ्रातॄन् अन्यानपि महीपतीन् ॥

राज्यार्धहेतवे तत्र कुलक्षयकृतन्तथा ।
हत्वा वंश्यान् कुरून् सर्वान् पश्चात्तप्तोऽभवत्तदा ॥

* * * *

येन सञ्चिन्त्यमानेन मुच्यते पञ्चपातकात् ।
तथाविधं व्रतं वक्ष्ये मम प्राणस्त्वमेव हि ॥

निमित्तमात्रन्तु त्वया कुलक्षयकृतं भुवि ।
पौर्णमास्यां सिते पक्षे द्वादश्यां श्रवणे यदि ॥

तदारभ्य व्रतं कार्यं मार्गशीर्षे तथा नृप ।
एकादश्यामुपवसेत् प्रतिपक्षे च पर्वणि ॥

श्रवणे तु ततो (सिते) पक्षे पूजयेद्गरुडध्वजम् ।
एवं संवत्सरं कुर्यात्तावत्संपूज्य केशवम् ॥

End:

तस्मात् त्वमपि कौन्तेय कुरुष्व व्रतमुत्तमम् ।
ये च शृण्वन्ति सततं ये पठन्ति द्विजोत्तमाः ॥

ये कुर्वन्ति व्रतमिदं ते यान्ति परमाङ्गतिम् ।
तेन सन्तुष्य(ते) सर्वजगत्कर्ता जनार्दनः ॥

Colophon:

इति भविष्योत्तरपुराणे विष्णुपञ्चकव्रतं सम्पूर्णम् ॥

No. 8525. वृषभव्रतकल्पः.
VṚṢABHAVRATAKALPAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 3*a* of the MS. described under No. 7758.

Complete.

This Vrata is intended to be observed by unmarried girls and consists in the worship of sixty-three images of a bull made of clay,

on the first day of the bright fortnight in the month of Kārtika. This is considered to have the power of enabling the girls to get good husbands.

Beginning:

सूत उवाच—

अथान्य(त्) संप्रवक्ष्यामि वृषभव्रतमुत्तमम् ।
वृषभत्र्यक्षसर्वाङ्गपतिर्येन भवेद्ध्रुवम् ॥
कार्त्तिके शुक्लपक्षस्य प्रतिपत्प्र(च्छु)भवासरे ।
त्रिषष्टिं पूजयेन्नित्यं कन्यका मृन्मयं वरम् ॥
सलक्षणं वेदिकायां स्वासने सन्निवेश्य च ।
सदूर्वाचणकाद्यैश्च . . . . ॥
षष्ठ्यान्तु मण्डपं कृत्वा फलभक्ष्योपशोभितम् ।
तन्मध्ये पूजयेद्वस्त्रगन्धमाल्यादिभिर्वृषम् ॥

End:

कथामिमाञ्च शृणुयात् श्रावयेद्वा समाहितः ।
प्राप्नोति वृषभस्कन्धसुपतिञ्च न संशयः ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे वृषभव्रतं सम्पूर्णम् ॥

No. **8526.** व्रतार्कः.

VRATĀRKAḤ.

Pages, 202. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 8167
Incomplete.

By Śaṅkara, son of Mīmāṁsaka Nīlakaṇṭha-Bhaṭṭa. Deals with the Vratas to be observed on each day of the bright and dark fortnights.

Beginning:

दिवाकरपदद्वन्द्वं फलद्वन्द्वप्रदायकम् ।
त्रैलोक्यतमसो नाशकर्तृ तत् प्रणमाम्यहम् ॥

* * * *

यो जाइ(ग्र)न्निजकरमन्दराद्रिमन्थै-
र्निर्मथ्य प्रथिततरान्धकारसिन्धुम् ।
लोकेभ्यो वितरति सत्प्रकाशरत्नं
वन्दे(ऽहं)वनजी(ज)वती(नी)विनोदबन्धुम् ॥
नामंनामं प्रणामोद्धुरभरविदलल्लोचनालिङ्गनेन
भ्राम्यद्भृङ्गाब्जभूरिभ्रमजन(नि)नय(नो) जानकीवल्लभाङ्घ्री ॥
तातश्रीनीलकण्ठामलपदकृपया लब्धशास्त्रार्थतत्त्वः
कुर्वे श्रीशङ्करोऽहं सहृदयहृदयाम्भोजतृप्त्यै व्रतार्कम् ॥

अत्र च स्वकर्तव्यविषयो नियतस्सङ्कल्पो व्रतमिति श्रीदत्तः, तन्न, अग्निहोत्रसन्ध्यावन्दनविषये सङ्कल्पेऽतिप्रसक्तेः । अभियुक्तासिद्धविषयस्सङ्कल्प एव व्रतम् ।

* * * *

Colophon:

इति मीमांसकनीलकण्ठभट्टात्मजशङ्करकृतौ व्रतार्के परिभाषासमाप्तिरभाणि ॥

अथ प्रतिपद्व्रतानि मात्स्ये—

वर्जयित्वा मधौ यस्तु दधिक्षीरघृतैक्षवम् ।
दद्याद्वस्त्राणि शुभ्राणि रसपात्रैर्युतानि च ॥

रसपात्रैर्दध्यादिपात्रैः ॥

संपूज्य विप्रमिथुनं गौरी मे प्रीयतामिति ।

End:

शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
ऋषिपञ्चमीति विख्यातं . . . . . ॥

No. 8527. शनित्रयोदशीव्रतकल्पः.

ŚANITRAYŌDAŚĪVRATAKALPAḤ.

Pages, 12. Lines, 6 on a page

Begins on fol. 24*a* of the MS. described under No. 2488.

Complete.

On the Vrata which consists in the worship of Śiva on the thirteenth day of the bright fortnight when the day happens to be a Saturday. This should be observed for one year on all similar days commencing from the month of Kārttika. This is considered to enable one to realise one's objects.

Beginning:

अथ कार्त्तिकादिमासेषु शनियुक्तायां त्रयोदश्यां शनिप्रदोषव्रतम् ।

स्कान्दे—

लोमश उवाच—

पुरा वृत्रादिभिर्दैत्यैर्वर्तमाने महाहवे ।
हतः शक्रेण नमुचिरपां फेनेन वै बली ॥
दैत्यान् पलायितान् दृष्ट्वा हन्यमानान् सुरैर्भृशम् ।
वृत्रः कोपपराविष्टो देवान् योद्धुमथाययौ ॥

* * * *

गुरुरुवाच—

कार्त्तिकादिषु मासेषु मन्दवारे त्रयोदशी ।
विशेषाच्छुक्लपक्षे तु सर्वकामकरी शुभा ॥
तस्यां प्रदोषसमये लिङ्गरूपी सदाशिवः ।
पूजनीयो हि देवेन्द्र सर्वकामसमृद्धये ॥
स्नात्वा मध्याह्नसमये तिलामलकसंयुतम् ।
शिवस्य चार्चनं कुर्याद्गन्धपुष्पफलादिभिः ॥

End:

दक्षिणां ब्राह्मणेभ्यश्च ततो मौनं विसर्जयेत् ।
एवं संवत्सरं कुर्यात् त्रयोदश्यामिदं व्रतम् ॥

इदमपि स्कान्दोक्तमेव ॥

No. 8528. शनित्रयोदशीव्रतकल्पः.
ŚANITRAYŌDAŚĪVRATAKALPAḤ.

Pages, 5. Lines, 4 on a page.

Begins on fol. 32*a* of the MS. described under No. 3055.

Complete. From Skāndapurāṇa.

Same as the above.

See under the previous number for the beginning.

End:

त्रिस्सप्तकृत्वो यः कुर्यात् ज्ञानपापक्षयो भवेत् ।
मुक्तिं चैव ततः प्राप्य ऋणरोगादिमोचनम् ॥

Colophon:

इति श्रीस्कन्दपुराणे शनित्रयोदशव्रितकल्पस्सम्पूर्णः ॥

No. 8529. शनित्रयोदशीव्रतकल्पः.
ŚANITRAYŌDAŚĪVRATAKALPAḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 10*a* of the MS. described under No. 2902, wherein it was called Śanipradōṣapūjāvidhi.

Extracted from the Sanatkumārasaṁhitā of Skandapurāṇa.

Similar to the above.

Beginning:

त्रयोदश्यां प्रदोषे तु सोपहारं महेश्वर(म्) ।
(दृष्ट्वा तु मुच्यते पापैर्ब्रह्महत्यादिभिर्नरः) ॥
स एव मन्दवारे तु यदा भवति सत्तम ।
तदा महत्तरं पुण्यं लभते नात्र संशयः ॥
त्रयोदश्यां प्रदोषे तु विधिनाभ्यर्च्य शङ्करम् ।
वाजपेयसहस्रस्य फलमाप्नोति पुष्कलम् ॥

End:

इदं व्रतं सप्तवारं यः कुर्यात् संयतेन्द्रियः ।
महत्फलमवाप्नोति कुलकोटिं समुद्धरेत ॥

Colophon:

इति श्रीस्कन्दपुराणे सनतकुमारप्रोक्तशनित्रयोदशीव्रतकल्पस्सम्पूर्णः ॥

No. 8530. शनित्रयोदशीव्रतकल्पः.

ŚANITRAYŌDAŚĪVRATAKALPAḤ.

Pages, 4. Lines, 11 on a page.

Begins on fol. 18*b* of the MS. described under No. 8198.

Complete.

Same as the above

See under the previous number for the beginning.

End:

मन्दवारे दिवा स्थित्वा निराहारो महेश्वर ।
त्रयोदश्यां निशा भौमी अर्पयामि सदाशिव ॥
इति व्रतसमर्पणम् ॥

No. 8531. शनैश्चरव्रतकल्पः.

ŚANAIŚCARAVRATAKALPAḤ.

Pages, 28. Lines, 5 on a page.

Begins on fol. 28*a* of the MS. described under No. 8239.

Incomplete.

This Vrata consists in purifying oneself on a Saturday in the month of Śrāvaṇa and embracing the Aśvattha tree conceived as the embodiment of Viṣṇu and repeating at the same time the several propitiatory names of Śani. This is considered to have the power of keeping all evils out of one's way.

Beginning:

रौद्राकारं श्यामलाङ्गं द्विबाहुं . . . . . ॥

. . . . . .

दीर्घाक्षं कोटरास्यं पर[शु]निभृत(सु)तनुं सूर्यपुत्रं प्रशान्तम् ।

ऊर्ध्वाधोदृष्टिपा[दं]तं सुरजनितभयं दीर्घगात्रं सुरेड्यं
वन्दे सौराष्ट्रदेशं भजत द्विजजनानन्दरूपं सगृध्रम् ॥
अश्वत्थमूलवासिने शनैश्चराय नमः—ध्यानम् ॥
छायापुत्रं महाकायं सायुधाष्टभुजं विभुम् ।
आवाहयामि मत्पीडां नाशयाम्य(द्या)र्थसिद्धये ॥
कोणस्थाय नमः—आवाहनम् ।

* * * *

अश्वत्थरूपिणं विष्णुं सर्वकामफलप्रदम् ।
ध्यानेनालिङ्ग्य बाहुभ्यामामूलाग्रं विलोकयेत् ॥
कोणस्थस्तुतिनामानि । यथाशक्ति त्र्यम्बकजपं कृत्वा ॥
इति पूजाविधानं सम्पूर्णम् ॥

* * * *

पार्वत्युवाच—
देव केन विधानेन कार्यं सौरेरिदं व्रतम् ।
सुप्रीतो येन सौरिः स्यात्तद्व्रतं ब्रूहि शङ्कर ॥
शङ्कर उवाच—
तैलाभ्यङ्गं ततः कृत्वा श्रावणे मन्दवासरे ।
धौतवस्त्रं दधानस्सन् गच्छेदश्वत्थपादपम् ॥

End:
इत्युक्त्वा तन्नमस्कृत्य विसर्ज(सृज)न्तु द्विजोत्तमाः ।
तस्मात् कुरुध्वम् ।

No. 8532. शमीपूजाविधानम्.

ŚAMĪPŪJĀVIDHĀNAM

Pages, 4. Lines, 4 on a page.

Begins on fol. 4*a* of the MS. described under No. 8188. Complete.

This Vrata consists in the worship of the Śamī tree on the tenth day of the bright fortnight in the month of Āśvina. This is considered to have the power of enabling one to win over enemies and to realise one's objects.

Beginning:

अथ शमीपूजाविधिरुच्यते —

पराहिते नमस्तुभ्यं वरदे रामपूजिते ।
प्रस्थानञ्च करिष्यामि सिद्धिर्भवतु मे सदा ॥

शम्यै नमः—ध्यानम् ।

काली कराली चामुण्डी शमी लोहितकण्टकी ।
सर्वशत्रुजयद्रूपा सर्वकामफ(ल)प्रदा ॥

शमीवृक्षराजाय नमः—आवाहनम् ॥

End:

नमो राजधनुर्देव नमो देवारिदर्पहा(हन्) ।
नमो ब्रह्म हरे शम्भो त्रै(त्रि)मूर्ते धिनु सर्वदा ॥

Colophon:

इति हेमाद्रौ व्रतकाण्डे विजयदशमीप्रयुक्तशमीपूजाविधिः समाप्तः ॥

No. 8533. शारदाव्रतपूजा.
ŚĀRADĀVRATAPŪJĀ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 6*b* of the MS. described under No. 8258. Complete.

Beginning:

अथातस्सम्प्रवक्ष्यामि देव्याः पूजां समृद्धिदाम् ।
सर्वदा पूजयेद्देवीं भारतीं सर्वमातरम् ॥
महानवम्यां प्राप्तायां पूजां कुर्वीत यत्नतः ।
मासि चाश्वयुजे प्राप्ते शुक्लपक्षे समागते ॥

या तिथिर्नवमी सद्भिः सा महानवमी स्मृता ।
उषस्युत्थाय सङ्कल्पमाचरेत विचक्षणः ॥
अर्चयिष्ये जगत्पूज्यां शारदां विशदप्रभाम् ।

End:

प्र णो देवी सरस्वतीति वाक्येन मन्त्रपुष्पम् ।
प्रार्थना, छत्रं, चामरं, नृत्तं, गीतम् ॥

Colophon:

समाप्तम् ॥

No. **8534.** शिवकृष्णाष्टमीव्रतकल्पः.

ŚIVAKṚṢṆĀṢṬAMĪVRATAKALPAḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 47*a* of the MS. described under No. 3055.

Complete.

This Vrata consists in the worship of Śiva on the eighth day of the dark fortnight in each of the twelve months commencing from Mārgaśīrṣa. This is considered to have the power of cleansing one of all sins, of bestowing prosperity and of enabling one to reach the world of Śiva.

Beginning:

कृष्णाष्टम्यां मार्गशीर्षे शङ्करेत्येवमर्चयेत् ।
उपोष्य पीत्वा गोमूत्रमनाहारो निशि स्वपेत् ॥
अतिरात्रस्य यज्ञस्य फलमष्टगुणं भवेत् ।
पौषे मासेऽथ संपूज्य शम्भुनामानमीश्वरम् ॥
कृष्णाष्टम्यां घृतं प्राश्य वाजपेयफलं लभेत् ।
माघे महेश्वरं नाम कृष्णाष्टम्यां प्रपूजयेत् ॥
निशि पीत्वा तु गोक्षीरं गोमेधाष्टफलं लभेत् ।

End:

वर्षमेवं चरेद्देवं नैरन्तर्येण यो नरः ।
कृष्णाष्टमीव्रतं भक्त्या तस्य पुण्यफलं शृणु ॥
सर्वपापविनिर्मुक्तः सर्वैश्वर्यसमन्वितः ।
वसेच्छिवपुरं(रे)नित्यं न ते(दे)ही याति कुत्र चित् ॥

Colophon:

इति नन्दिकेश्वरप्रोक्तायां शिवधर्मशास्त्रसंहितायां शिवकृष्णाष्टमीव्रतकल्पस्सम्पूर्णः ॥

No. 8535. शिवरात्रिपञ्चलिङ्गदानाङ्गपूजा.

ŚIVARĀTRIPAÑCALIṄGADĀNĀṄGAPŪJĀ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 107*a* of the MS. described under No. 7758, wherein it is called Śivarātripañcaliṅgadānavidhi

Complete. From Skandapurāṇa.

This Vrata consists in the worship of Śiva in the fourteenth day of the dark fortnight in the month of Māgha and in presenting five Liṅgas. This is considered to have the power of cleansing one of all sins.

Beginning:

शिवरात्रिव्रतं देव करोमि व्रततुष्टिदम् ।
धर्मार्थकाममोक्षार्थं शिव शम्भो त्वदाज्ञया ॥
माघे कृष्णचतुर्दश्यां निराहारो महेश्वर ।
तिथ्यन्ते पारणं तत्र करिष्येऽहं त्वदाज्ञया ॥

इति सङ्कल्प्य । उमामहेश्वरं पूजयेत् ।

तत्र फणिभूषणं ध्यायेत् । शङ्कराय नमः, गौर्यै नमः, आवाहनम् । चन्द्रार्धमौलिने सुव्रतायै नमः, पाद्यम् ।

End:

यथाशक्त्यनुसारेण लिङ्गदानं विशेषतः ।
लिङ्गदानन्तु दातव्यं सर्वपापनिवृत्तये ॥

सूतः—

एवं दानं तु यः कुर्याच्छिवरात्रौ विशेषतः ॥
स मर्त्यस्सर्वपापेभ्यो मुच्यते नात्र संशयः ॥

Colophon:

इति स्कन्दपुराणोक्तशिवरात्रिकर्तव्यपबलिङ्गदान(विधि)स्समाप्तः ॥

No. 8536. शिवरात्रिव्रतकथा.

ŚIVARĀTRIVRATAKATHĀ.

Substance, palm-leaf. Size, 12⅓ × 1½ inches. Pages, 34. Lines, 8 on a page. Character, Telugu. Condition, fair. Appearance, old.

Contains the Adhyāyas 71 and 73 of Vīramāhēśvarācāra-saṅgraha of Nīlakaṇṭhanāganāthācārya.

On the story relating to the Śivarātrivrata.

Beginning:

श्रुतानि पातकानीह त्वयोक्तानि महामते ।
यैरन्विताश्च जायन्ते कृमयः पक्षिणस्तथा ॥
ब्राह्मणः क्षत्रियो वैश्यश्शूद्रो वा यतिनोऽपि वा ।

* * * *

षण्मुखाय पुरा प्रोक्तं नन्दिकेश्वरभाषितम् ।
तदेव कथयिष्यामि द्वैपायनमुखाच्युतम् ॥
शिवरात्रिव्रतं नाम सर्वपापप्रणाशनम् ।
आचण्डालं मनुष्याणां भुक्तिमुक्तिप्रदायकम् ॥

End :

एतच्छ्रुत्वा वचस्तस्य महादेवेन भाषितम् ।
प्रणिपत्य महादेवं स्तुत्वा च विविधैस्स्तवैः ॥
दण्डमुद्रां समादाय स्वां पुरीं प्रययौ यमः ।

Colophon :

इति श्रीनीलकण्ठनागनाथाचार्यविरचिते श्रीमद्वीरमाहेश्वराचारसङ्ग्रहे सदाचारनिरूपणे शिवरात्रिव्रतमाहात्म्यव्रतकथने यमशङ्करसंवादे त्रिसप्ततितमोऽध्यायः ॥

No. 8537. शिवरात्रिव्रतकल्पः.

ŚIVARĀTRIVRATAKALPAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 66*a* of the MS. described under No. 2907.

Complete.

This Vrata consists in the worship of Śiva on the fourteenth day of the dark fortnight in the month of Māgha. This is considered to have the power of cleansing one of all sins.

Beginning :

यावदावर्तते शम्भोर्माघे कृष्णचतुर्दशी ।
तावदस्यां न भोक्ष्यामि न स्वपा(प्स्या)मि महाप्रभो ॥
शिवरात्रिव्रतं देव करिष्ये तव सन्निधौ ।
निर्विघ्नं सिद्धिमायातु प्रसन्ने त्वयि शङ्कर ॥
एवं संकल्प्य मन्त्राभ्यां शिवभक्तिसमन्वितः ।
पञ्चामृतविधानेन पूजां कुर्यात्समाहितः ॥

End:

येन केनापि शाठ्येन परिहासेन वा पुनः ।
ज्ञानतोऽज्ञानतो वापि शिवरात्रिदिने तथा ॥

केवलेनोपवासे च कैवल्यफलमश्नुते ।
संग्रहेण महापुण्यं शृण्वतां पापनाशनम् ॥

Colophon:

इति शिवरात्रिव्रतकल्पस्सम्पूर्णः ॥

No. **8538.** शिवरात्रिव्रतकल्पः.
ŚIVARĀTRIVRATAKALPAḤ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 38*a* of the MS. described under No. 8188.
Complete.
Similar to the above.
See under the previous number for the beginning.

End:

शिवरात्रिव्रतन्दे(ताद्दे)व सर्वपापप्रणाशन ।
इह लोके सुखन्देहि परत्र च पराङ्गतिम् ॥

Colophon:

शिवरात्रिव्रतं सम्पूर्णम् ॥

No. **8539.** शिवरात्रिव्रतकल्पः.
ŚIVARĀTRIVRATAKALPAḤ.

Pages, 5. Lines, 11 on a page.

Begins on fol. 16*b* of the MS. described under No. 8198.
Complete.
Similar to the above.

Beginning:

यावदावर्तते शम्भो माघे कृष्णचतुर्दशी ।
तावत्त्वहं न भोक्ष्यामि न स्वपा(प्स्या)मि महेश्वर ॥
शिवरात्रिव्रतं देव करिष्ये तव सन्निधौ ।
निर्विघ्नं सिद्धिरायातु प्रसन्नो भव शङ्कर ॥

End:

दारिद्र्याब्धिनिमग्नानां समुद्धरणकारकम् ।
नीराजनं गृहाणेदं त्रैलोक्यध्वान्तनाशन । नीराजनम् ॥

No. **8540.** शिवरात्रिव्रतकल्पः.
ŚIVARĀTRIVRATAKALPAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 24*a* of the MS. described under No. 3055.

Complete.

Similar to the above.

Beginning:

प्रणम्य तं शिवं शम्भुं महदानन्दरूपिणम् ।
यस्य मूर्तिभिरष्टाभिः करोति जगतां स्थितिम् ॥
ययाच यमिनां श्रेष्ठः सर्वज्ञं नन्दिकेश्वरम् ।

सनत्कुमार उवाच—

लोकेऽस्मिन् सम्मतं पुण्यमपुनर्भवकाङ्क्षिणाम् ।
स्वल्पायासेन साक्ष्येण व्रतेन तपसापि वा ॥

* * * *

शिवरात्रिव्रतं चाहुरिदं शिवकरं नृणाम् ।
या तिथिश्शाङ्करी ज्ञेया माघे कृष्णचतुर्दशी ॥
युगादिस्सा तिथिः पूर्वमायाता शुद्धिदा नृणाम् ।
